Dedicated

to

My Grand-mother

Annapurnabai Gore

CONTENTS

PREFACE

When I read a paper on the *Āryā-Śataka* in the Classical Sanskrit Section of the twelfth All-India Oriental Conference held at Benares in December 1943, the scholars present evinced great interest in the extracts from this charming little poem ascribed to the celebrated Appayya Dīkṣita and Mm. P. V. Kane and Dr. J. B. Chaudhari, among others, pointed out the desirability of publishing the poem, thus lending support to the suggestion of Dr. Raghavan to the same effect. Accordingly, the text of the poem along with the paper read at the Conference was first published in the *Poona Orientalist* Vol. VIII Nos. 3–4.

This edition is the result of suggestions I received on publication of the Poem that it should be made available separately in the form of a book. Then I requested Dr. Raghavan to write a Sanskrit Commentary to the poem and it gives me great pleasure to publish the text along with his brief and lucid commentary.

On the strength of the Colophons and the general tenor of the poem I have tentatively ascribed it to the celebrated Appayya Dīkṣita. I shall be thankful to the learned readers if they will favour me with their views and evidence to enable me to settle the problem of the authorship of the poem.

I offer hearty thanks to Dr. Raghavan for readily consenting to write the commentary on the poem and

helping me with suggestions in the constitution of the text. I am very thankful to my Guru Prof. H. D. Velankar for encouragement and suggestions I have received from him in the preparation of this edition. I offer grateful thanks to my maternal uncle Mr. Balkrishna H. Lele for granting some financial aid in the printing of this edition. The management of the Deccan Paper Mills deserves thanks for supplying me at controlled rates the paper required for this edition. My student-friends Mr. N. V. Saswadkar and Mr. S. V. Prabhu prepared the copies of the Manuscripts and to them my thanks are due. I tender thanks to Dr. R. N. Sardesai, L.C.P.S., the proprietor of the Poona Orientalist for permission to issue the poem in this edition and to the Manager of the Samarth Bharat Press, Poona, for printing the work with enthusiasm and great care.

Poona 2,
August 1944.

N. A. GORE

INTRODUCTION

The Manuscript Material

The *Catalogus Catalogorum* of Aufrecht records a single manuscript only of the *Āryāśataka* of Appayya Dīkṣita.[1] The manuscript belonged to the private manuscript Collection of Mr. Govinda Shastri Nirantar of Nasik and probably due to this fact the work does not seem to have attracted the attention of scholars even though it was ascribed to Appayya Dīkṣita. Recently, however, I discovered or more correctly speaking re-discovered a manuscript of the *Āryā-Śataka* of Appyya Dīkṣita in the MSS. Collection at the Mīmāṁsā Vidyālaya of Poona. When I sent a description of it, along with that of other MSS. in the Collection to my friend Dr. V. Raghavan for being used in the preparation of the New Catalogus Catalogorum which is undertaken by the University of Madras, he pointed out to me the desirability of publishing it and supplied me information about two more MSS. of the same work—one belonging to the MSS. Collection of Pandit Raghunatha Shastri Patankar of Rajapur and the other to the Prājña Pāṭha Śālā, Wai. Through the courtesy of Pandit Raghunatha Shastri Patankar and Pandit Laksmana Shastri Joshi, the Hon Secretary of the Prājña Pāṭha Śālā, I have been able to secure both of these manuscripts.

As yet we do not know the whereabouts of the Nasik MS. The manuscripts belonging to the late Govinda Shastri Nirantar have been recently purchased by the Bombay University Library but some of the manuscripts in the Collec-

1. Āryā-Śataka by Appayya Dīkṣita, BL. 44—CC. II. 10.
[BL = List of Sanskrit MSS. in Private Libraries in the Bombay Presidency, Prepared by Dr. R. G. Bhandarkar, Bombay, 1893.]

tion as originally listed by Dr. Bhandarkar, are missing from the collection secured by the University Library. Unfortunately, the *Āryā-Śataka* of Appayy Dikṣita is one of the missing MSS., I record here its description as given by Dr. Bhandarkar as a clue to the identification of the Nirantar manuscript, if by chance some more manuscripts of the *Āryā-Śataka* are discovered later on :—No. 44 आर्या-शतकम्—पत्राणि ५ ; पंक्तयः १० ; अक्षराणि ३८ ; ग्रंथसंख्या १२५ ; कर्ता अप्पय्यदीक्षित ; आरंभः। दयया यदीयया वाक् नवरसरुचिरा सुधाधिकोदेति। शरणागतचिंतितदं तं शिवचिंतामणिं वंदे॥ समाप्तिः। निर्व्याधि मे शरीरं निराधि चेतः सदा समाधिपरम्। कुरु शर्व सर्वदा त्वं नान्यं कामं वृणे कंचित् ॥ ९९ ॥ आर्यापतेः पदाब्जे निहितं शतपद्यपत्रमयपुष्पम्। आर्याशतं सुकृतिनां हृदयामोदं सदा वहतु ॥ १०० ॥

At present, therefore, we have the *Āryā-Śataka* preserved only in three MSS. at Poona, Rajapur and Wai. As all the MSS. are complete, it has been possible to bring out a reliable edition of the text of the *Āryā-Śataka* with the help of these three MSS.

Description of the Manuscripts

1. The Mīmāṁsā Vidyālaya MS. (= MS. M):

   Size—9 inches by 4·7 inches.

   Foll.—6 ; lines 11 to a page and about 30 letters to a line.

   Material—Hand-made paper.

   Script—Devanāgarī. Handwriting bold, uniform and legible.

   Extent—Complete.

   Age—The MS. appears to be about 150 or 200 years old. Marginal corrections are found on 9 out of

12 pages. Yellow pigment is used to remove unwanted letters or parts thereof. The MS. is carefully revised and is mostly correct.

Begins—(fol. 1^a) श्रीरस्तु। दयया यदीयया वाक् नवरसरुचिरा etc.

Ends—(fol. 6^b) आर्याशतं सुकृतिनां हृदयामोदं सदा वहतु ॥ १०० ॥

Colophon—श्रीमदपय्यदीक्षितविरचितार्याशतकं संपूर्णं ॥ श्रीसांबसदाशिवार्पणमस्तु ॥ कलंकी शीतांशुः कुटिलहृदया सापि तटिनी पशुर्नंदी सोयं कठिनहृदया शैलतनया। निषेधादन्येषां सततसमवेते दयितया कृतां या मन्नर्कि भव भवति विज्ञापयति कः ॥
अपय्यदीक्षितकृत-शतक पत्रें ६.

2. The Rajapur Manuscript (= MS. R):

Size—6·8 inches by 5·5 inches.

Foll.—6 ; lines 20 to a page and about 16 to 20 letters to a line.

Material—Mill-made paper.

Script—Devanāgarī. Handwriting beautiful, small, uniform and legible.

Extent—Complete.

Age—The MS. must be assigned to the end of the 19th *or the beginning of the 20th century* A. D., *as* the watermark on fol. 1 has the following name and date in it : AMIRIE & .... 1875.

Begins—(fol. 1^b) श्रीगणेशाय नमः दयया यदीयया वाक् नवरसरुचिरा *etc.*

Ends—(*fol.* 10^a) आर्याशतं सुकृतिनां हृदयामोदं सदा वहतु ॥ १०० ॥

Colophon—इति श्रीमद्भरद्वाजकुलतीलकश्रीमदपैयादीक्षितविरचितं दैवार्याशतकं समाप्तं ॥ ॥ श्रीरस्तु ॥ ॥ शुभं भवतु ॥

Fol. 1^a *has* श्रीयुत भिकाजी गोविंद घोरपणकर, राजापुर इत्येतैः

श्रीसंस्कृत पुस्तक संग्रहालय बंदर राजापुर, जिल्हा, रत्नागिरी

प्रदत्तम् and श्रीमदप्पैया दीक्षितविरचितं शैवार्या शतकम् । and on fol. 6^b is written भि. गो. घो. दत्तम् । श्रीमदप्पैयादीक्षितकृत-शैवार्याशतकम् ॥

The MS. is written breadth-wise, like a book; and each line contains a half of the stanza. It does not bear marks of revision and contains many scribal errors.

3. The Prājña Pāṭha Śālā Manuscript (= MS. P):

Size—Of foll. 1–5, 18 inches by 5·6 inches; of fol. 6, 9 inches by 5·6 inches.

Foll.—6; lines 37–41 to a page and about 20 letters to a line; fol. 6 has only 16 lines.

Material—Hand-made paper of a rough texture.

Script—Devanāgarī. Hand-writing very bold, uniform and legible. The MS. is written only on one side of the paper. *On fol.* 6^b *some monetary* account is entered in *Moḍī* script.

Extent—Complete.

Age—1802 A. D. See colophon below.

Begins—(fol. 1^a) शिवार्या प्रारंभः ॥ आपय्या दीक्षितविरचित. श्रीगणेशायनमः ॥ दयया यदीयया वाक् नवरसरुचिरा etc.

Ends—(fol. 6^a) आर्याशतं सुकृतिनां हृदयामोदं सदा वहतु ॥१००॥

Colophon—इतिश्रीमदापय्यादीक्षितिविरचित शिवार्याशतक समाप्तं॥ ॥ छ ॥ श्रीसांबार्पणमस्तु शके १७२४ चैत्र वद्य १२ गुरुवासरे इदं पुस्तकं समाप्तं ॥ ॥ छ ॥ ॥ छ ॥

The Text

All the MSS. present essentially the same text, the variant readings notwithstanding. But the stanzas 26, 27,

28 of M and P are given by the R in the order of 28, 26, 27 respectively; 98th of M and P is omitted by R; 99th is counted as the 98th and कुरु बहुशास्त्राभ्यासं साधय योगांश्च तेन सुलभोऽहं। कथमत्र 'नायमात्मे 'त्यादि शृण्वन्मनः कुर्यात् ॥ is given as the 99th. The stanza कलंकी शीतांशुः etc. in the Śikhariṇī metre found in M after the colophon is omitted by R and P.

The Title

Though the title 'Śaivāryā-Śataka' of the R or Śivāryā Śataka of the P is more significant than the mere 'Āryā-Śataka' of the M, the latter is to be found in the last stanza of the Poem itself, is the title of the oldest of the three MSS. used by me and it is found in the Nirantar MS. also and hence it has been adopted by me.

The Author

In the MSS. M and P the colophon gives the author's name as श्रीमदप्पय (or य्या) दीक्षित or श्रीमदाप्पय्यादीक्षित only, while that of the MS. R gives it as भरद्वाजकुल-तिलकश्रीमदप्पैया दीक्षित. I have seen three lists[1] of the works of the celebrated Appayya Dīksita but the *Āryā-Śataka* or Śiva° or Śaivāryā-Śataka is not to be found in any one of them. On the other hand, Dr. V. Raghavan has shown[2]

1. (a) *Śivādvaita-nirnaya* of Appayya Dīkṣita ed. by S. S. Suryanarayan Sastri, University of Madras, 1929—Intro. pp. 10–15.
   (b) *Madva-tantra-mukha-mardanam* of Appayya Dīkṣita, Ānandāśrama Sk. Series, No. 113, Poona, 1940—Intro. pp. 6–7.
   (c) —Do— ed. by Pandit Rāmanātha Dīkṣita, Benares 1941—Intro. pp. 3–4.
2. (a) "Appayya Dīkṣitas II and III", Proc. X, All-India Ori. Conf. pp. 176–180.
   (b) "Some Appayya Dīkṣitas", Annals of Oriental Research, University of Madras, Vol. VI, pt. 1.

how some of the works which *are assigned to the great* Appayya Dīkṣita are really the works of other authors bearing the same or a similar name. Two of these latter belonged to the family of the great Appaya Dīkṣita, the son of Raṅgarājādvarin, of Bharadvāja gotra and are designated by Dr. Raghavan as Appaya Dīkṣita II and Appayya Dīkṣita III. *In the absence, therefore, of an evidence of* more definite nature such as the mention of the names of the parents, the mere statement that the author is Appaya Dīkṣita belonging to the Bharadvāja gotra would not justify us in assigning the present work to the celebrated Appaya Dīkṣita I (1558–1630 A. D. or 1520–1592 A. D.). But if we take into consideration the fact that the great Appayya Dīkṣita, *though not a bigot*, *was an ardent devotee of Śiva*, the wording of the colophon of the MS. R—भरद्वाजकुलतिलक-श्रीमदप्पैया दीक्षित—and the contents of the *Āryā-Śataka*, I hope we would not be far wrong if we tentatively ascribe the *Āryā-Śataka* to the great Appayya Dīkṣita himself.

The Poem

The *Āryā-Śataka is so named because it consists of 100 stanzas in Āryā metre. It is written in easy,* flowing and graceful language. *In it the author fervently* appeals to God Śiva to receive him into His favour, to destroy his enemy in the form of worldly existence, to remove his poverty and to produce a sense of devotion in him. The Poem may be roughly divided into two parts of fifty stanzas each. In the first part, which is a sort of a dramatic monologue, the author imagines that as *he approaches Lord Śiva, He would raise objections to* the qualifications of the author to be a recipient of His Grace. The author meets these objections by witty and

punning references to the several epithets of Śiva and explains away the defects in himself :—e. g.

चेतसि चिंतय वामां वा, मां वा, न द्विधा स्थितस्याहम् ।
इति यदि वदसि दयाब्धे वामार्धे सा तवाप्यस्ति ॥ ५ ॥
मित्रकलत्रसुतादीन् ध्यायस्यनिशं न मां क्षणं जातु ।
यदि कुप्यसि मयि दीने तुलयामि त्वां कथं सह तैः ॥ ६ ॥
ललनालोलविलोकनजितमित्यवमन्यसे कथं मां त्वम् ।
त्वयि जायार्धशरीरे शिव शिव नालोकनानुभवः ॥ ९ ॥
गुणहीनतां तनूजे मयि दृष्ट्वा किं परित्यजस्येवम् ।
उचितं गुणिनस्त्वेतन्निर्गुणरूपस्य तेऽनुचितम् ॥ १५ ॥
पुत्रः पितृवत् पुत्री मातृवदित्थं ममात्र को दोषः ।
अहमपि भोगासक्तः प्रकृतिर्जाता विषादवर्त्ता ॥ ११ ॥

Śiva is called पञ्चानन. The author has punningly expressed this idea in the following stanza :

कामक्रोधकटाभ्यां मदजलधारां निरंकुशो स्रवति ।
मत्कृतदुष्कृतकरिणि प्रकटा पञ्चास्यता तेऽस्तु ॥ १६ ॥

The same fact is expressed by a reference to the system of *Village Pañcāyats* :

तव कोऽहं त्वं मम कः पञ्चस्त्वेवं विचारयस्वेति ।
ब्रूपे दीनदयाब्धे पञ्चमुखत्वं त्वयि व्यक्तम् ॥ २३ ॥

He has utilized the names विश्वेश and भूतपति to show how it is necessary for Lord Śiva to protect him, if these names are to be significant :

पालय वा मां मा वा मत्तनुभूता तु पञ्चभूतततिः ।
पोष्यावश्यं भवता भविता नो चेन्न भूतपतिः ॥ ४१ ॥
नाङ्गीकृतो मया त्वं तत एव न दर्शनं मम तवास्ति ।
इति नोत्तरं प्रदेयं शिव शिव विश्वेशनामासि ॥ ४५ ॥

If Śiva were to say that the author should not expect to get anything from Him as He was only दिगम्बर, and so he

should go to another donor, it is pointed out that he is also श्रीकण्ठ (having the goddess of Wealth in His throat)

याचस्वान्य धनिन भविता तव को दिगम्बराल्लाभ ।
मा मा प्रतारयैव त्यास श्रीकण्ठनामासि ॥ २४ ॥

Similarly there are about 15 references to the अर्धनारी. नटेश्वर form of God Śiva, e g ललनाकलित मह (2) त्वयि जायार्धशरीरे (९) and so on The name महादेव suggests the following idea to the poet s mind

सत्ये तृणे च चुष्टिं तुल्या देव सदैव विदधाति ।
देवो महान् बत त्व गुरुलघुवार्ता कथ कुरुषे ॥ ३३ ॥

The mythological allusion that कुबेर has been made the lord of wealth by Śiva has given rise to the following three stanzas

यक्षाधीना रक्षा ऽयक्ष निधीना कुतो नु वा कुरुषे ।
साक्षान्मनुष्यधर्मोऽप्यहह कथ नु विस्मृतिर्मम ते ॥ ३८ ॥
धनदे सखित्वमेतत्तव यत्तत्रास्ति विस्मय क इव ।
मयि निर्धने तदास्ता त्रिजगति चित्र कियद्भावि ॥ ३९ ॥
सखितारूपनिधान वित्तनिधान द्विधा धन तव यत् ।
नैककरे नृपनीतिस्तत्रान्यतरन्निधेहि मयि ॥ ४० ॥

If Śiva refuses to favour the author, on the ground of his being a half hearted devotee the author justifies himself by pointing out that everything about Śiva is 'half' and incomplete

वपुरर्धं वामार्धं शिरसि शशी सोपि भूषण तेऽर्धम् ।
मामपि तवार्धभक्त शिव शिव देहे न धारयसि ॥ १२ ॥

Remembering that Śiva had burnt Cupid (मनोभव) to ashes the poet requests Him to destroy his poverty for that also like Cupid infatuates his mind

दारिद्र्याख्यमनोभू क्लीव चेतोऽपि मोहयत्यनिशम् ।
एनं क्षीन कर्तुं धन्य कोन्यस्त्वदन्योस्ति ॥ ५० ॥

पार्थः कलहं धनुषा ताडनमपि मूर्ध्नि ते न किं कृतवान् ।
तत्रापि ते प्रसन्नं चेतः सन्ने मयि कुतो न ॥ ७५ ॥

Then the poet praises Lord Śiva in the अर्धनारीश्वर form in the last 10 stanzas and lastly prays that his body and mind should be free from affliction, his heart devoted to contemplation—this is all that he desires through the favour of Śiva and nothing else.

Though this Poem cannot be called an example of the उत्तम-काव्य, the expressed sense being equally if not more striking than the suggested sense, [e. g. चेतःकीर विहारं परिहर परितः प्रयत्नेन । अत्तुं कालबिडालो धावति शिवपञ्जरं प्रविश ॥ ५४ ॥], it is a delightful composition on account of the power of the author to express a striking idea in a happy, flowing style. What is particularly note-worthy is the undercurrent of humour that runs throughout the poem. But as we read it, an indelible impression is left on our mind that the author, inspite of his light-heartedness and humour, was a sincere devotee of Śiva and his main concern is that Lord Śiva should bless him with His favour. From the several references[1] to the अर्धनारीश्वर form of Śiva that are found in this short poem, it may be suggested that the author was a worshipper of Śiva in his अर्धनारीश्वर form.

Addendum—In the 2nd l. of stz. 81 all the three MSS. read विषयविषाशनतः, and the learned commentator has explained it in the only way in which it can be explained. But the trend of the stanza suggests that विषयविषाशन constitutes the reason why the poet calls himself a पशु *i.e.* 'विष' must be a characteristic food of a पशु, here a bull. This sense can be obtained by emending विष to—बुस or बुष and reading the expression विषयबुसाशनतः and explaining it as विषयरूप बुसस्य कडंगरस्य अशनतः भक्षणाद्धेतोः. I am thankful to Pandit Maheshvarshastri Joshi of Poona for suggesting this emendation.

1. Stzs. 2, 5, 9, 12, 14, 44, 61, 71, 73, 90, 91, 92, 93, 94, 98.

श्रीमदप्पय्यदीक्षितविरचितम्
आर्याशतकम्
श्रीराघवशर्मकृतटीकोपेतम् ॥

दयया यदीयया वाङ् नवरसरुचिरा सुधाधिकोदेति ।
शरणागतचिन्तितदं तं शिवचिन्तामणिं वन्दे ॥ १ ॥

अप्पयदीक्षितविलिखितशैवार्यासौष्ठवोन्मेषम् ।
वृत्त्या तूलिकया लघु कुरुते कुतुकेन राघवकलावित् ॥

भरद्वाजकुलतिलकायमाना अप्पय्यदीक्षिताः चतुरधिकशतप्रबन्धकर्तृतया प्रसिद्धा वा, तद्वंश्या अन्ये वा केचन तन्नामानः शतमानाभिरार्याभिः आर्यापतिं प्रपद्यमानाः 'तं शिवचिंतामणिं वन्दे' इति नमस्कारेण समङ्गलमुपक्रमन्ते । दययेति । यदीयया *दयया* यस्य शिवचिन्तामणेः करुणया नवभी रसै रुचिरा । माधुर्येण *सुधाया अप्यधिका वाग्* ईदृशी *देवविषया* काव्यरूपा उदेति तं शरणागतचिन्तितदं शिवचिन्तामणिं वन्दे । शरणागतैः यद्यच्चिन्त्यते तत्सर्वं ददातीति, तम् शरणागतचिन्तितदम् । अनेन शिवस्य *चिन्तामणित्वरूपणं समर्थितं* भवति; *चिन्ताप्रदो हि मणिः चिन्तामणिः* । तत्प्रसादपरिणामा एवेमा आर्यारूपा मे वाच इति भावः ॥ १ ॥

शिरसि सितांशुकलाढ्यं करुणापीयूषपूरितं नयने ।
स्मितदुग्धमुग्धवदनं ललनाकलितं महः कलये ॥ २ ॥

शिरसीति । चन्द्रकलाङ्कितशिरस्कम्, दयासुधापूर्णनयनम्, मन्दस्मितपयोमनोहरमुखम् ललनाकलितम् अर्धनारीरूपम् महः शिवरूपम् तेजः कलये इत्यर्थः ॥ २ ॥

अन्ते चिन्तयते यत्तत्तामेतीति च त्वया गदितम् ।
शिव तव चरणद्वन्द्वध्यानान्निर्द्वन्द्वता चित्रम् ॥ ३ ॥

अन्त इति । अन्ते प्राणान्तकाले जनः यत् चिन्तयते तत्ताम् तस्य भावम् एतीति यत् त्वया भगवता गदितम् भवदाज्ञारूपश्रुतिस्मृतिषु । यथा श्रूयते छान्दोग्ये (३.१४. १.) ' यथाक्रतुरस्मिन् लोके पुरुषो भवति, तथेतः प्रेत्य भवति ' इति । स्मर्यते च गीतासु (८. ६) : ' यं यं वापि स्मरन्भावं त्यजत्यन्ते कलेवरम् । तं तमेवैति कौन्तेय सदा तद्भावभावितः ॥ ' इति । क्रतुः संकल्पः । अयं च वेदान्तिभिः तत्क्रतुन्याय इतीर्यते । अन्तकाले यद्ध्यानेन प्राणांस्त्यजति तद्भावं प्रेत्य भजतीति हि अनेन न्यायेन उक्तम् । हे शिव ! त्वच्चरणद्वन्द्वध्यानात्तु निर्द्वन्द्वता लभ्यत इति चित्रमाश्चर्यम् । *निर्द्वन्द्वता नाम निर्गतशीतोष्णसुखदुःखादिद्वन्द्वभावः ।* यथा चोक्तं वेदान्तदेशिकैः यादवाभ्युदयकाव्ये दामोदरलीलावर्णने (४. ३५)–

' बद्धं तथा भावयतां मुकुन्दमयत्नविच्छेदिनि कर्मबन्धे ।
तपस्विनी तत्क्रतुनीतिराधा सव्रीडमारण्यकथासु तस्थौ ॥ ' इति ॥३॥

द्रुतमुद्धर हर संहर संहर भववैरिणं त्वतित्वरया ।
भव भवतोऽपि भवोऽयं रिपुरेतन्निन्दितं जगति ॥ ४ ॥

द्रुतमिति । द्रुतं त्वरितम् उद्धर । *संसारविपदः मामिति शेषः । अतित्वरया* भववैरिणं संसाररूपशत्रुम् संहर संहर । त्वराप्रयुक्ता वीप्सा । अथवा संहर दुर्धरभववैरिणमिति पाठः । दुर्धरो दुस्सहो भववैरी तम् । हे हरेति अभिप्रायगर्भा संबुद्धिः । हे भव ! अयं भवः संसारः भवतोऽपि तवापि रिपुः । *न केवलं मम, अपि तु तवापि, यतः समाननाम्नोः निसर्गतो वैरमस्ति । यथाह कालिदासः–' अन्यथा जगति राम इत्ययं शब्द उच्चरित एव मामगात् । व्रीडमावहति मे स संप्रति व्यस्तवृत्तिरुदयोन्मुखे त्वयि ॥* (रघु. ११. ७३)। परमेश्वरो भवानपि भवः, अयं निकृष्टोऽपि भव इत्येतत् जगति निन्दितं गर्हितं भवति । अथवा एतं निन्दितं जहिहि इति पाठः स्यात् । निन्दितम् एतं भवरूपं रिपुं जहिहि दूरमुत्सारय ॥ ४ ॥

---

१. यत्तत्तदेतीति–R. २. संहर हर दुर्धर भव°–R.

चेतसि चिन्तय वामां वा मां वा न द्विधा स्थितस्याहम् ।
इति यदि वदसि दयाब्धे वामार्धे सा तवाप्यस्ति ॥ ५ ॥

चेतसीति । वामां स्त्रियं वा, मां वा चेतसि चिन्तय; द्विधा स्थितस्य कामकामार्युभयलोलायमानमानसस्य नाहम् भवामि । हे दयाब्धे शिव ! दयालुस्सन्नपि त्वं यदि एवं मां वदसि, अहमेवमुत्तरं दद्याम् । कथमिति चेत् ? वामा स्त्री पार्वती तवापि अर्धे शरीरार्धे अस्ति, यतः अर्धनारीश्वरस्त्वम् । ननु त्वमपि न केवलं न वामाविमुखः, परन्तु तया विभक्तस्वशरीरोऽप्यसि । अहं वामां चित्त एव चिन्तयामि, त्वं पुनः, यथा वेद न दृष्टं श्रुतं वा प्रपञ्चे, तथा शरीरेणैव तां वहसि । चेतसीत्याद्यारभ्य कविशिवयोः संवादरूपः सन्दर्भः । प्रसादमिच्छते भक्ताय तद्वितरणे हेतवो भगवता प्रदर्श्यन्त इति कृत्वा तद्धेतूनां समाधानोत्तराणि भक्तेन दीयन्ते ॥ ५ ॥

मित्रकलत्रसुतादीन् ध्यायस्यनिशं न मां क्षणं जातु ।
यदि कुप्यसि मयि दीने तुलयामि त्वां कथं सह तैः ॥ ६ ॥

मित्रेति । अनिशं मित्रकलत्रसुतादीन् ध्यायसि, न मां क्षणमपि जातु कदाचित् ध्यायसि इति यदि मयि दीने कुप्यसि त्वं, तदा भगवन्त त्वामेव वदामि; त्वां तैस्सह कथं तुलयामि । 'मित्रकलत्रादिभिर्हि पदे पदे त्वं स्मरसि न मां, सा ते प्रिया नाहम्' इत्यादि कथ्यते । त्वं पुनः परमेश्वरः किमर्थं तैः मदीयमित्रकलत्रसुतादिभिः मामनिशमाकुलयद्भिः आत्मानं समानीकृत्य अनुचितं कोपं भजसि ? तत्सत्कारकर्मभिर्दीनस्य मे आन्तरं भावं ननु भवानेव मे परमः सुहृद् बन्धुश्च जानाति । नापि मे समुचितमिदं यद् यादृश्या वृत्त्या तानुपचरामि, तयैव भवतोऽप्युपचार इति ॥ ६ ॥

मत्कृतदुष्कृतशान्तिर्विषवह्निजलादियातनया ।
यदि निश्चयस्तवायं प्रेषय गरलाग्निगङ्गौघान् ॥ ७ ॥

मत्कृतेति । त्वं पापी, पापशान्तये नरकयातना अनुभव । यावच्च त्वं पापेभ्योऽपूतः तावच्च न सुलभस्ते ममानुग्रहः इति भगवत आक्षेपमुत्थाप्यो-

---

३. °स्थितश्चाहम्—R.

त्तरयति मत्कृतेति । विषवह्निजलादियातनया । विषवह्निजलादिभिः प्रयुक्ताः नरके यमाज्ञया पापिनां तत्पापानुरूपाः यातनाः प्रवर्त्यन्ते, ताभिश्च यातनाभिः पापफलानुभूत्या पापशान्तिः भवति । तादृशयातनयैव मत्कृतदुष्कृतशान्तिः मत्कृतपापकर्मशान्तिः भविष्यति इति यदि तवायं निश्चयः, भवतु नाम स निश्चयः, भवतु च तादृशी यातना मे पापशान्तये; किन्तु यातनार्थानि विषवह्निजलानि तव शरीर एव कण्ठे गरलरूपेण, भाले नेत्राग्निरूपेण, शिरसि गङ्गौघरूपेण च सन्ति; तानि मत्पावनाय प्रेषय ॥ ७ ॥

भोगं विहाय योगं साधय दास्ये तवापि परभागम् ।
मम किं न वावकाशस्त्वद्भूपाभोगिनां मध्ये ॥ ८ ॥

भोगमिति । त्वं भोगासक्तः न योगासक्तः, कथमनुग्राह्यो मे इत्याक्षेपमुक्त्वा प्रतिक्षिपति भोगमिति । भोगमैन्द्रियिकसुखासङ्गं विहाय योगं मयि चित्तनिवेशनरूपं साधय, तदा तवापि परमागमुत्कर्षं दास्ये इति हे शिव वदसि चेदेवमास्ते ते उत्तरम्–त्वद्भूषाभोगिनां त्वद्भूषणभूतानां भोगिनां सर्पाणां बहूनां मध्ये मम एकस्य भोगिनः किम् अवकाशो नास्ति ? यदि भोगिन इमे तव अलंकारीभवितुमुचितम्, तदा भोगी अहमपि एकस्ते नातिभाराय स्याम्; मामप्यङ्गीकुरु, आदाय आभरणीकुरु च । भोग इति श्लिष्ट पदम् । 'भोगः सुखे स्त्र्यादिभृतावहेश्च फणकाययोः' इत्यमरः ॥८॥

ललनालोलविलोकनजितमित्यवमन्यसे कथं मां त्वम् ।
त्वयि जायार्धशरीरे शिव[४] शिव नाऽऽलोकनानुभवः ॥ ९ ॥

ललनेति । ललनानां लोलं चञ्चलं यद् विलोकनं तेन जितमिति मां त्वम् कथमवमन्यसे । अहं स्त्रीदृष्टिवश इति नोचिता मयि ते अवज्ञा । यतः त्वयि जायार्धशरीरे सति शरीरैकार्धनिहितभार्ये सति न आलोकनस्य अनुभवः, न ते जायाविलोकनानुभवः संभवति । न हि एकस्मिन्नेव वक्त्रे एकं नेत्रं परं वीक्षितुं क्षमते । शिव शिवेति करुणवाचिकानुभावः, जायालोकनसुख-

४. शिव शिव लोके हि ननुभिवः (?)—R.

मञ्चित शिव प्रति अनुकम्पाद्योतक । यतस्तव स्त्रीदृष्टिपातसम्भवो नास्ति, तत तदरसिक तच्छक्त्यनभिज्ञश्च त्व माम् अह स्त्रीदृष्टिजित इति अवजानासि । जायार्धशरीर इति साभिप्रायो निर्देश, अह केवल ललनालोकनजित, भवान् पुन ललनामेव शरीरे बिभर्ति इति परिहासद्योतनार्थं ॥ ९ ॥

स्मरणादनुपदमीदृग्विस्मृतिशीलो न वल्लभोऽसि मम ।
उत्पाद्याशा[५] भङ्क्तुर्लग्ना वृत्तिस्तवैवेयम् ॥ १० ॥

स्मरणादिति । अविच्छिन्नकृतभगवत्स्मृतेर्हि भगवान् प्रसीदेत्, अह पुन न तथा इति शङ्कामुत्थाप्य प्रतिवक्ति । स्मरणाद् अनुपदम्, स्मृत्वा तदनन्तर सहसैव विस्मृतिशील त्व मम न वल्लभोऽसीति शिवोक्ति । प्रथम स्मरति मयि रक्षिष्यामीति आशा मयि उत्पाद्य, अद्य मां त्व न रक्षसि, विस्मृतवानिति हेतो यत् तत्तवैव इय आशामुत्पाद्य भङ्क्तु वृत्ति आशाभङ्गरूपा पूर्वापरविरुद्धा वृत्ति इमा वस्तो मयि सङ्क्रान्ता । विस्मरणशीले किं मयि दोष किं कृतप्रतिज्ञात्यागिनि भवति दोष इति आशय ॥१०॥

पुत्र पितृवत्पुत्री मातृवदित्थ ममात्र को दोष ।
अहमपि भोगासक्त प्रकृतिर्जाता विषादवती ॥ ११ ॥

भक्त स्वस्य भोगासक्ततायां शोकाकुलतायां च न कोऽपि दोष इत्याह पुत्र इति । 'पितॄन् समनुवर्तन्ते नरा, मातरमङ्गना' इति रामायणोक्त प्रकारेण लोकसिद्धमेतद् यत् पुत्र पितृवद् वर्तते गुणे, पुत्री च मातृवत् । इत्यमत्र ईदृशेऽस्मिन् विषये मम को दोष । कीदृशे विषये? तव पुत्रोऽहमपि त्वमिव भोगासक्त, मम प्रकृतिश्च तन्मातृभूतपार्वतीवद् विषादवती जाता इत्यस्मिन् विषये । भोगासक्त सुखासक्त सर्पशरीरासक्तश्च । विषाद वती दु खवती, शिवयुक्ता च । विषमत्तीति विषाद शिव ॥ ११ ॥

---

५ उत्पाद्याशा—R

वपुरर्धं वामार्धं शिरसि शशी सोऽपि भूषणं तेऽर्धम् ।
मामपि तवार्धभक्तं शिव शिव देहे न धारयसि ॥ १२ ॥

स्वस्य अपूर्णभक्तता न दोषाय, यतो भगवतोऽपूर्णवस्तुषु प्रसिद्ध आदरविशेष इत्याह वपुरर्धमिति । वपुः तव शरीरम् अर्धम्, अर्धमेव । वामा ते प्रिया च त्वद्विभक्तशरीरा अर्धम्, अर्धमेव ते प्राप्ता । ते शिरसि भूषणं सः शश्यपि चन्द्रोऽपि अर्धमेव अंशत एव एककलारूपेण वर्तते । तव अर्धभक्तं लेशतो भक्तं मामपि देहे न धारयसि । शिव शिवेति करुणोक्तिः अधारणप्रयुक्तशोकद्योतिका ॥ १२ ॥

स्तनपं शिशुं त्वदीयं पालय साम्ब द्रुतं न पासि यदि ।
जगतः पितेति गीतं यातं नामेति जानीहि ॥ १३ ॥

क्षीरकण्टकोऽहं मुग्धडिम्भः, त्वं च साम्बः जगतः पितासि यथार्थय ते प्रथामित्याह स्तनपमिति । स्तनपं स्तन्यपायिनं त्वदीयं शिशुं मामिति शेषः । हे साम्ब ! अम्बया सह वर्तमान ! साभिप्राया संबुद्धिः । मातृसन्निधौ क्रियमाणां शिशोः प्रार्थनां प्रायः पिता पूरयति हि; किञ्च अम्बासामीप्यात् पालनरूपो मातृगुणः त्वय्यपि संक्रान्तः स्यात् । तादृशो द्रुतं यदि न पासि न रक्षसि, तदा ते त्वं जगतः पिता इति यत् गीतं नाम तद् यातं नष्टमिति जानीहि बुध्यस्व ॥ १३ ॥

मातरि हित्वा बालं कार्याकुलधीः पिता बहिर्याति ।
शिव वत शक्नोपि कथं स्वाङ्गान्मन्मातरं मोक्तुम्[६] ॥ १४ ॥

माता त्वां रक्षतु इति परित्यागो नोचितस्ते पितुरित्याह मातरीति । दृश्यते हि लोके यत् कार्याकुलधीः पिता बालं पुत्रं मातरि हित्वा मातृहस्ते निक्षिप्य गृहाद् बहिर्याति । हे शिव इदं पितृशीलं तु अर्धनारीरूपस्य ते नानुकर्तुं क्षमम् । स्वाङ्गात् मन्मातरं पार्वतीं देवीं मोक्तुं कथं शक्नोपि प्रभवसि । बतेत्यनुतापे । मातृमोक्ष एव न संभवति, कुतो मां तस्यां निक्षिप्य तव बहिस्सञ्चारः ॥ १४ ॥

६. भोक्तुं—R.

गुणहीनतां तनूजे मयि दृष्ट्वा किं परित्यजस्येवम्[७] ।
उचितं गुणिनस्त्वेतन्निर्गुणरूपस्य तेऽनुचितम् ॥ १५ ॥

सत्यादिगुणवतो हि पुरुषस्य भगवता संग्रहः क्रियत इति आक्षिप्य समाधत्ते गुणहीनतामिति । किं मयि तनूजे गुणहीनतां दृष्ट्वा मामेवं परित्यजसि ? एतत् एवं परित्यागः गुणिनस्ततः पितुरुचितम्; निर्गुणरूपस्य ते अनुचितम् । निर्गुणेतिश्लेषेण स्वस्य भगवता समानयोगक्षेमता समर्थ्यते भक्तेन । निर्विशिष्ट-ब्रह्मरूपो निर्गुणः शिवः, सत्याद्यभावेन च निर्गुणो भक्तः ॥ १५ ॥

कामक्रोधकटाभ्यां मदजलधारां निरङ्कुशे स्रवति ।
मत्कृतदुष्कृतकरिणि प्रकटा पञ्चास्यता तेऽस्तु ॥ १६ ॥

कामक्रोधेति । कामक्रोधकटाभ्यां तद्रूपोभयकपोलाभ्यां मदजलधारां स्रवति स्रावयति निरंकुशे स्वैरे मत्कृतदुष्कृतकरिणि मदनुष्ठितपापरूपहस्तिनि ते पञ्चास्यता सिंहता प्रकटा अस्तु प्रकटिता भवतु । पञ्चास्यः पञ्चवक्त्रः शिवः, पञ्चास्यः सिंहश्च । उचितं हि सिंहस्य हस्तिन उपमर्दः । काम-क्रोधप्रयुक्तं मे पापं नाशयेति अर्थः ॥ १६ ॥

त्वद्धीनं मां दीनं दृष्ट्वा विषयातिरागसम्बद्धम्[८] ।
धावत्यकीर्तिरेषा नाथः शक्तोऽप्युदासीनः ॥ १७ ॥

त्वद्धीनमिति । त्वया हीनमनाथमत एव दीनं विषयातिरागसम्बद्धं दुरभिनिविष्टं मां दृष्ट्वा । दर्शनक्रियायाः कर्ता लोकः । 'स्मृत्वा स्मृत्वा याति दुःखं नवत्वम्' इतिवत्, एषा ते अकीर्तिः अयशः धावति प्रचरति । किंरूपा ? अस्य नाथः एतद्रक्षणे शक्तोऽपि उदासीनः उपेक्षणशील इत्येवंरूपा । दृश्यते ह्येतत् लोके यत् सति प्रभावति पितरि दुश्चरन्त कृपणां दशामापन्नं वा बालकं दृष्ट्वा जना वदन्ति शक्तोऽपि पिता अस्मिन्नुदास्ते इति ॥ १७ ॥

---

७. परित्यजस्येव—P. ८. सवद्धम्—M, P. ९. धावन्त्यकीर्ति°—M, P.

अरिभिर्जितैरशक्तैर्विज्ञाप्यं सेवकैः प्रभोर्नीतिः ।
विषयैर्जितोऽस्मि शम्भो तव यच्छ्लाघ्यं तदारचय* ॥ १८ ॥

अरिभिरिति । अरिभिः जितैः अशक्तैः सेवकैः प्रभोः विज्ञाप्यम्, वयं शत्रुभिः पराजिताः न च प्रतिकर्तुं शक्नुमो दुर्बला इति आवेदनीयम्। नीतिः, इति हि नीतिरित्यर्थः । अहं चैवं शत्रुभूतैः विषयैः कामादिभिः जितोऽस्मि । इतस्ते विज्ञापितो मे पराजयः । हे शम्भो ! तव प्रभुभूतस्य यत् श्लाघ्यं श्लाघायोग्यं स्यात् तदारचय कुरु । पाठस्तु आचरयेति दृश्यते कोशत्रयेऽपि । सेवकार्थे उद्युञ्जन् शत्रून्निषूदयेत्यर्थः ॥ १८ ॥

संरक्ष्यते स्वदासैर्यद्यद्वस्तु प्रभोरभीष्टतरम् ।
दासस्तवेष्टकामः कान्तां कनकं कथं त्यजेयमहम् ॥ १९ ॥

कामिनीकाञ्चनादिषु न ते विरक्तिरिति न मां तिरस्कर्तुमर्हसीत्याह— **संरक्ष्यत इति** । प्रभोः स्वामिनः यद्यद्वस्तु अभीष्टतरं नितरां प्रियं तत्तत् स्वदासैः संरक्ष्यते इति लोकस्वभावः । तव इष्टकामो दासस्सन् अहं कथं कान्तां कनकं च त्यजेयम् । मम कान्ता इष्टा, तव अर्धनारीश्वरस्य तु इष्टतरा; मम कनकमिष्टम्, तव मेरुशरासनस्य कर एव कनकं बिभ्रतः तदिष्टतरम् । त्रिपुरवधे शिवेन कनकगिरेः कोदण्डीकरणं प्रसिद्धमेव ॥१९॥

पापी पापं सुकृती सुकृतं भुंक्ते ममात्र किं नु गतम् ।
इत्यौदास्यमयुक्तं [10]भृत्याकीर्तिः प्रभोरेव ॥ २० ॥

पापीति । पापी पापं भुंक्ते, सुकृती सुकृतं भुंक्ते; अयं च पापी भुक्तां नाम पापम्; अत्र एतस्मिन् विषये मम किन्नु गतम् 'इति औदास्यमुपेक्षणमयुक्तम् । ते इति शेषः । मयि दासे दुर्गते तवैव यशः कलंकितं भवति; यतः भृत्याकीर्तिः प्रभोरेव । शंकरप्रभोर्दासः एवं वर्तत इति हि लोको वदिष्यति ॥ २० ॥

---

* ०चरय—M, P, R. १०. भकृत्याकीर्तिः—R.

विकलेऽतिदीनचित्ते विषयाशामात्रधारिणि नितान्तम् ।
मयि रोषतः कियत् ते वद[११] वद शम्भो यशो भावि ॥ २१ ॥

विकल इति । तथा च नाहमिदानीं कामादिपापसक्तः, यतः जरया विकलः, अत एव अतिदीनचित्तश्च । परन्तु वासनाबलात् कामपि विषयेषु आशां केवलं धरामि । एतदवस्थे मयि नितान्तम् अतिमात्र रोषतः ते कियद् यशो भावि इति हे शम्भो वद वद । 'वद भोः शम्भो यशो भवति' इति वा पाठः ॥ २१ ॥

स्वगृहे भुवनत्रितये योगक्षेमे सुखानि चत्वारि ।
मत्प्रतिवचनं हि विना पञ्चमवदनस्य कुत्र गतिः ॥ २२ ॥

स्वगृह इति । स्वगृहे भुवनत्रितये च एवम् आहत्य स्थलचतुष्टये योगक्षेमे योगक्षेमार्थे चत्वारि ते मुखानि । व्यापृतानि सन्तु इति शेषः । शिष्टस्य पञ्चमवदनस्य मत्प्रतिवचनं विना कुत्र हि गतिः । मत्समाधानमेव ते पञ्चमवदनस्य कर्म, अन्यथा तस्य नैरर्थक्यमेवेति भावः ॥ २२ ॥

तव कोऽहं त्वं मम कः पञ्चस्वेवं विचारयस्वेति ।
ब्रूषे दीनदयाब्धे पञ्चमुखत्वं त्वयि व्यक्तम् ॥ २३ ॥

तवेति । हे दीनदयाब्धे । तव कोऽहम् ? मम त्वं कः ? इति पञ्चसु पञ्चायतसभ्येषु विचारयस्व इति मां ब्रूषे । किं दीनदयाब्धिरसन् त्वमेवं कस्त्वं मे, को वाहं ते इति विवादविचारं कुरु इति वदसि ? त्वयि एव पञ्चमुखत्वं पञ्चायतन्यायसभासदृशपञ्चवक्त्रत्वं व्यक्तम् । अत एव त्वमेव एतद्विवादनिर्णयं कुरु ॥ २३ ॥

याचस्वान्यं धनिनं भविता तव को दिगम्बराल्लाभः ।
मां[१२] मा प्रतारयैवं ख्यातः श्रीकण्ठनामासि ॥ २४ ॥

याचस्वेति । अन्यं धनिनं याचस्व । दिगम्बरात् मत् तव को लाभो भविता ? दिशोऽम्बरम् यस्य स दिगम्बरः नग्नरूपः शिवः, दरिद्रश्च । एव-

११. वद भो शंभो यशो भवति—R. १२. मा मा मता°—R.

मुक्त्वा मां मा प्रतारय । श्रीकण्ठनामा ख्यातोऽसि । श्रीः लक्ष्मीः शोभारूपा विषनीलिमप्रयुक्ता, ऐश्वर्यरूपा च कण्ठे यस्य सः तन्नामा प्रसिद्धस्त्वमसि; न दरिद्रः । श्रीकण्ठ इत्यनेन त्वद्वचनानुपातिनी श्रीः इति ध्वनिः ॥ २४ ॥

वसनाशनप्रदातरि मयि जीवति किं समाकुलस्त्वमिति ।
दोहाय मोच्यमानो वत्सः किं न त्वरामयते ॥ २५ ॥

वसनेति । *वसनाशनप्रदातरि ते वस्त्राहारप्रदे मयि प्रभौ जीवति सति,* इति एवं त्वं किं समाकुलः व्यग्रः इति मां पृच्छसि चेदेवं वदामि । दोहाय मोच्यमानो वत्सः त्वरां न अयते न गच्छति किम्? आतुरस्य लोकस्य स्वभावोऽयं यत् कामपूरणे सिद्धे सन्निहितेऽपि वा *लिप्साप्रयुक्तः संभ्रमो भवत्येव* ॥२५॥

पातकराशिरितीदं[१३] त्वयाभिधानं श्रुतं न तद् दृष्टम् ।
तद्दर्शनकुतुकं यदि मां द्रष्टुं किं विलम्बसे देव ॥ २६ ॥

येन केनापि प्रकारेण स्वस्य भगवद्दृष्टिगोचरतामाकांक्षमाण आह पातकेति । पातकराशिः पापसमूह इति इदम् अभिधानमुक्तिः । त्वया श्रुतं, परन्तु तत् न दृष्टम् । *न भवता एतावत्कालं राशीभूतः पापो दृष्टस्स्यात्* । तद्दर्शनकुतुकं तत्पापभारदिदृक्षा ते यदि, हे देव मां द्रष्टुं किं विलम्बसे ? अहं हि मूर्तः पापभारः ॥ २६ ॥

पातकराशिरसि त्वं पश्याम्यत एव नाहमिति वदसि ।
पातकरूपाज्ञाने शिव तव सर्वज्ञताभङ्गः ॥ २७ ॥

पापदर्शनासंभवे मां पश्येत्युक्तम् । पापिनं नाहं पश्यामीति यदि भगवान् वदेत्तदोत्तरमाह पातकराशिरिति । त्वं पातकराशिरसि । अत एव अहं त्वां न पश्यामीति वदसि ? वदसीति प्रश्नकाकुः । तदा हे शिव पातकरूपाज्ञाने पातकस्य रूपस्य तत् कीदृशं इति अज्ञाने तव सर्वज्ञताभङ्गः । तावता सार्वज्ञ्यं खण्डितमेव भवति असर्वपरामर्शित्वात्तस्य ॥ २७ ॥

---

१३. R gives stzs. 26, 27, 28 above in the order of 27, 28, 26.

पापं पापमितीदं करोपि शिव किं मुधा बुधान् भ्रान्तान् ।
तत्सत्यं चेन्न कथं त्वयानुभूतं न दृष्टं वा ॥ २८ ॥

यत्पापमालम्ब्य स्वस्य शिवेन हान समाध्येत, तदेव पुनरपि निराचिकीर्ष-न्नाह–पापमिति । हे शिव ! इद पाप पापमिति बुधान् मुधा भ्रान्तान् किं करोपि ? तत्वविदामपि बुधानामगोचरस्यास्य पापस्य प्रवाद किं करोषि ? तत्पाप सत्य चेत् त्वया सर्वज्ञेन तत् कथ न अनुभूत, न वा दृष्टम् ! यतस्तत् न ते गोचर, ततस्तन्नास्त्येव ॥ २८ ॥

पापे[१४] लोकानुभवः स एव मानं [१५]ममाप्यननुभूते ।
न हि परकीयानुभवः ज्ञातुं शक्यः परेणापि ॥ २९ ॥

मया अननुभूतमदृष्टमपि तत् पाप लोके जनैरनुभूयत एव, लोकप्रमाणे-नास्य सत्त्वमिति चेत् प्रत्याह–पाप इति । मया अननुभूतेऽपि पापे लोका-नुभवः स एव प्रसिद्धतया वर्तमान एव मान मम प्रमाणमिति चेत् नैतद्भ-वितुमर्हति । यतः परेणापि अन्येनापि बुद्धिशक्त्या उत्कृष्टेन सता त्वादृशेनापि न परकीयोऽनुभवः ज्ञातु शक्यो हि । न हि परानुभवः ते प्रमाणीभवेत्॥२९॥

लोकाभिन्नः सोऽहं वक्तुं वाञ्छयं ह्युपक्रमस्तव चेत् ।
सिद्धा मनोरथा मे त्वत्तः कस्यापि लोकस्य ॥ ३० ॥

अस्य आक्षेपस्य कोऽप्यन्तर तदाक्षेप चाह–लोकाभिन्न इति । न लोका-नुभवः परकीयानुभवः, ममैवानुभवो भवितुमर्हति, यतस्सोऽह लोकाभिन्न एव इति वाक्यमुत्तररूप वक्तु तव उपक्रमश्चेत् यद्येव वक्तुमपक्रमसे, तदा इष्टापत्तिः । त्वत्तः त्वत्सकाशादेव मे मनोरथाः सिद्धाः । कीदृशस्य मे ? लोकस्य कस्यापि अस्य त्वदभिन्नतया त्वयैव अङ्गीकृतस्य लोकस्य कस्यापि अश-भूतस्य मे । अस्मिन् त्वदभिन्ने लोके अहमपि कोऽपि; एव च अहमपि त्वदभिन्न इति त्वयैव अभ्युपगते, हन्त कृतार्थोऽहमिति भावः ॥ ३० ॥

---

१४. पापो–R. १५ ममाप्यनुभूते–R.

अतिवल्गनं ममैतन्मूढत्वं यद्यपि प्रभोः पुरतः ।
दीनः करोमि किं वा मद्विषये को[16] निवेदयति ॥ ३१ ॥

अतिवल्गनमिति । यद्यपि प्रभोः तव पुरतः अग्रे मम एतद् अतिवल्गनं तर्करूपं मुखरत्वं मूढत्वं मौढ्यम् । प्रभूणां हि पुरो दासानां विनयस्समुदाचारः, न तु वादः । तथापि दीनः कष्टां दशां प्राप्तोऽहं किं करोमि; मम कष्टामवस्थां ते निवेदयितुं मध्यस्थः कोऽपि वर्तेत चेद् ममापि तूर्ष्णीभावः सुकरः, तादृशः पुनर्नास्ति । मद्विषये मामधिकृत्य को निवेदयति । तव सकाश इति शेषः । न कोऽपीति भावः । अतो ममेयं निवेदनप्रगल्भता मर्षणीया ॥ ३१ ॥

लघुरसि किं त्वयि दयया मा[17] मा मंस्थाः शिवेति सहसा त्वम् ।
भारो सुवोऽस्मि धृत्वा स्वकरे तुलयाशु मां शम्भो ॥ ३२ ॥

लघुरसीति । नितान्तमात्मसंभावनयैवं वदसि, लघुरसि, तत्त्वतस्त्वमतिफल्गुरसि; किं त्वयि दयया ? मम दयां प्रकाशयितुं कस्त्वयि अवकाशः ? इति हे शिव ! त्वं सहसा रभसेन मा मा मंस्थाः । मा मां लघुं गणय । हे शम्भो तत्त्वतः अहं सुवो भारोऽस्मि; न लघुः, किन्तु अतिघनोऽहम् । यदि मम वचने ते न प्रमाणबुद्धिः, त्वं स्वयमेव स्वकरे मां धृत्वा आशु शीघ्रमेव तुलय । अहं किं लघुः उत गुरुः इति परीक्षस्व । धृत्वा स्वकरे इति पदस्वारस्येन यावता भगवता स्वकरेण धृतः तावतैव दत्तालंबनः प्राप्तभगवत्स्पर्शश्चाहं कृतार्थस्स्यामित्यपि ध्वन्यते ॥ ३२ ॥

सस्ये तृणे च वृष्टिं तुल्यां देवः सदैव विदधाति ।
देवो महान् बत त्वं गुरुलघुवार्तां कथं कुरुषे ॥ ३३ ॥

ननु भवामि नाम लघुरेवाहम्; किमेतावता ते दयाया अपात्रतां गन्तुं युक्तमित्याह सस्य इति । सस्ये कलमादिके प्रशस्ते क्षेत्रवर्तिनि बहुकृषिफलभूते । तृणे मार्गे स्वयंरूढे फल्गुनि च । देव इन्द्रः सदैव तुल्यां वृष्टिं विदधाति । तथा उदारो हि सः । त्वं महान् देवः । महादेव इति आख्यातः ।

१६. को वा निवे°—R. १७. मा मा—R.

विप्रलंभ एव । यतः स्वशैशवे पानाय पयः प्रार्थयमानेन उपमन्युना महर्षिणा कदा वा कस्मै वा दुग्धोदधिर्दत्तः, यत् त्वं तद्धेतोः दुग्धोदधिमेव व्यतरः । इयमुपमन्योर्दुग्धाब्धिवितरणकथा लिङ्गपुराणे १०७ अध्याये प्रसिद्धा ॥ ३५॥

प्रबलतरोन्मादाढ्यं त्वामप्यगणय्य धावमानं च ।
मच्चेतोऽपस्मारं नियमय शम्भो पदाभ्यां ते ॥ ३६ ॥

प्रबलतरेति । प्रबलतरोन्मादाढ्यमत्यन्तोन्मत्तमत एव त्वामपि अगणय्य (अगणयित्वा) सर्वनियन्तारमचिन्तयित्वा धावमानमितस्ततो विप्लवमानं च मच्चेतोऽपस्मारं मच्चेत एव अपस्मारः तद्रूपोऽसुरः । तं हे शम्भो ते पदाभ्यां नियमय निगृह्णीष्व । नटराजमूर्तेः शिवस्य भुजङ्गत्रासितकरणेन नर्तने उद्धृता-दन्यद्यत्पदं दक्षिणं, तत्पदेन अपस्मारो नाम असुरः अधो अवमर्द्यते । मम चेतश्च अपस्मारतोऽपि दुष्टतरं तवोभाभ्यामपि पादाभ्यां मर्दय ॥ ३६ ॥

आशापिशाचिका मां भ्रमयति परितो दशस्वपि दिशासु ।
स्वीये [20]पिशाचवर्गे सेवायै किं[21] न योजयसि ॥ ३७॥

'आशेति । आशैव पिशाचिका मां परितो दशस्वपि दिशासु भ्रमयति भ्रमणशीलं करोति । स्वीये पिशाचवर्गे अनुचरीभूते सेवायै स्वपरिचरणाय मामपि पिशाचग्रस्तं किं न योजयसि । पिशाचीकृतस्य ममापि ते भूतपते-रुचितः संग्रहः । अथवा ताम् आशानाम्नीं पिशाचिकां स्वीये पिशाचवर्गे सेवायै किं न योजयसि । त्वया स्वसेवायां नियुक्ता सा मद्बाधनाय नावकाशं प्राप्स्यति ॥ ३७ ॥

यक्षाधीनां रक्षां त्र्यक्ष निधीनां कुतो नु वा कुरुषे ।
साक्षान्मनुष्यधर्मोऽप्यहह[22] कथं नु विस्मृतिर्मम ते ॥ ३८ ॥

यक्षाधीनामिति । हे त्र्यक्ष ! त्रिलोचन ! निधीनां शङ्खपद्ममहापद्म-मकरकच्छपमुकुन्दकुन्दनीलखर्वाणां नवानां रक्षां यक्षाधीनां कुबेरतदनु-चरायत्तां कुतो नु वा कुरुषे ? 'मनुष्यधर्मा धनदः' इत्यमरः । यदि कुबेरः

२०. पिशाचिवर्गे—R, P. २१. किं नियोजयसि—M.
२२. °धर्माऽहह— M ; °धर्माप्यहह—R.

मनुष्यधर्मा इति तथा तस्य निधिरक्षण विहितम्, इतोऽहमस्मि साक्षान्मनुष्य-धर्मा । स तु मनुष्यधर्मा, अहं पुनर्मनुष्य एव, ततश्च तद्विशिष्टः । तादृशस्य मम ते कथ नु विस्मृतिः कथ निधिरक्षणनियोगसमये मां विस्मृतवानसि ॥३८॥

धनदे सखित्वमेतत् तव यत् तत्रास्ति विस्मयः क इव ।
मयि निर्धने तदास्तां त्रिजगति चित्रं कियद्भावि ॥ ३९ ॥

धनद इति । 'कुबेरः त्र्यम्बकसख' ' इत्यमरः । धनदे कुबेरे यत् तवैतत् सखित्व मैत्री तत्र तस्मिन्विषये क इव विस्मयः, आश्चर्यम् ? प्रायो धनिनः सखायः सुलभा एव लोके । तत् सखित्व तव मयि निर्धने पुरुषे आस्ताम् । यदि तथा स्यात् तत् त्रिजगत्यपि कियच्चित्र भावि ? कियदाश्चर्यं भविष्यति ॥ ३९ ॥

सखितारूपनिधानं वित्तनिधानं द्विधा धनं तव यत् ।
नैककरे नृपनीतिस्तत्रान्यतरन्निधेहि[२३] मयि ॥ ४० ॥

सखितेति । सखितारूपनिधान वित्तनिधानमिति तव यद् द्विधा स्थित धन, तद् द्विरूपमपि धनमेककरे न नृपनीति । न हि नृपा नीतिज्ञा. एककर एव एकस्मिन्नेव पुरुषे सर्वं प्रसाद दर्शयन्ति, कस्मैचित् किमपि यच्छन्ति, अन्यस्मै अन्यदित्येवमेव नृपनीति । त्वमपि ता नृपनीतिमनुसृत्य तत्र मैत्री-वित्तयोर्धनद्वययोरन्यतरद् मयि धेहि, अन्यच्च धनद एव आस्ताम् । यदि धनदे सख्य ते इष्टतर, तदा निधीन् मयि निक्षिप, यदि निधिनिक्षेपस्य स एव योग्य', तव सख्य मह्य वितीर्यताम् ॥४०॥

पालय वा[२४] मां मा वा मत्तनुभूता तु पञ्चभूततति: ।
पोष्यावश्यं भवता भविता नो चेन्न भूतपतिः ॥ ४१ ॥

पालयेति । मा पालय वा, मा पालय वा । यत्नपूर्वक मां रक्ष वा मा वा । तव मद्रक्षणार्थव्यवसायाप्रादुर्भावेऽपि कथञ्चिदह भवता रक्षणीय एव । कथमिति चेदाह–त्व च नाम्नैव भूतपति. भूताना पालक. । अतो भवता

---

२३ °स्तत्रान्यतर नि°—R , स्तत्रान्यतर न्निधेहि—P

२४. मा वा मा वा—R

आर्या. ३

मत्तनुभूता मच्छरीरभूता पञ्चभूततितिस्तु पञ्चभूतनिवहस्तु अवश्यं पोष्या। नो चेत्, तथा न पोषयसि चेत्, त्वं न भूतपतिः भविता। वृथा हि ते तन्नाम स्यात्॥ ४१॥

अतिकोमलं मनस्ते मुनिभिर्गीतं कुतोऽधुना कठिनम्।
मन्ये [२५]विपाशनार्थं [२६]कठिनं चेतस्त्वया विहितम्॥ ४२॥

अतिकोमलमिति। ते मनः मुनीभिरतिकोमलं गीतम्। तत्कुतोऽधुना कठिनम्? कठिनीभूतमिति मद्विषये स्फुटम्। कदैवं कठिनीभूतं स्यात्? मन्ये विपाशनार्थं कालकूटप्राशनाय चेतस्त्वया कठिनं विहितम्। न हि सुकुमारमनाः कोऽपि विषाशने प्रवर्तेत॥ ४२॥

मां द्रष्टुमष्टमूर्ते करुणा तेऽद्यापि किं न वोल्लसति।
भिक्षाप्रसङ्गतो वा[२७] कियतां नो यासि सदनानि॥ ४३॥

मामिति। हे अष्टमूर्ते शिव। पञ्चभूतानि सूर्याचन्द्रमसौ यजमानश्चेति एतानि शिवस्य अष्टमूर्तयः। मां द्रष्टुं दर्शनेन अनुग्रहीतुमद्यापि ते करुणा किं वा नोल्लसति। किं तथाविधो दुर्लभः प्रभुरसि, न बहिः कुतोऽपि चरसि, न कमपि पश्यसि? नैव तथासि। त्वं भिक्षाटनरूपः खलु; भिक्षाप्रसङ्गतो कियतां सदनानि वा न यासि। प्रतिसदनं प्रवेशो हि भिक्षुशीलम्। तथा सति ममैकस्यैव कथं ते दर्शनं न भवति?॥ ४३॥

वित्ताधिपः सखा ते भार्या देहे तवान्नपूर्णाख्या।
ऊरीकृतं न दूरीकुरुषे भिक्षाटनमपीश[२९]॥ ४४॥

नित्यभिक्षुरसि त्वमिति निन्दास्तुतिमाह–वित्ताधिप इति। वित्ताधिपः धनदः ते सखा। अन्नपूर्णाख्या तव भार्या देहे शरीर एव वर्तते। तथा वित्ताद्यसंपन्नोऽपि स्वयमीशोऽपि ऊरीकृतमङ्गीकृतं भिक्षाटनमपि अप्रशस्तमपि तत्, हे ईश प्रभो, न दूरीकुरुषे न त्यजसि। अङ्गीकृतमिति तादृशं भिक्षाचरणमपि अजिहासत् त्वं किं मादृशमङ्गीकृतं भक्तं त्यक्ष्यसि इति भावः॥४४॥

२५. विपनाशनार्थं—R. २६. कठिणं—R, M.
२७. प्रसङ्गतोद्वा कियंति नो—R. २८. उररी°—R. २९. भिक्षाटण°—R, P.

नाङ्गीकृतो मया त्वं तत एव न दर्शनं मम तवास्ति ।
इति नोत्तरं प्रदेयं शिव शिव विश्वेशनामासि ॥ ४५ ॥

अस्तु नाम तथा, त्वां पुन. कदाहमङ्गीकृतवानिति पृच्छसि किम् ? ब्रवीम्युत्तरमित्याह—नाङ्गीकृत इति । त्व मया नाङ्गीकृत. । तत एव हेतोः मम दर्शन तव नास्ति । इति उत्तर न प्रदेयम् त्वया । यत. हे शिव शिव ! त्व विश्वेशनामा असि । विश्वमात्र यदा त्वदीय, तदा अहमेव त्वया नोरीकृत इति न सभवति ॥ ४५ ॥

यदि देहगेहरूपं ददासि देशाधिकारकार्यं मे ।
रसनाख्यलेखपत्रे[३०] सुदृढा कुरु नाममुद्रां ते ॥ ४६ ॥

यदीति । मे देहगेहरूप शरीर गृह-रूप देशाधिकारकार्य तद्देशेषु तत्स्वामितया तत्कार्यनिर्वाहपर्यवेक्षणादिरूपमधिकारकार्य यदि ददासि, तदधिकारप्रामाण्याय मम रसनाख्यलेखपत्रे ते नाममुद्रा सुदृढा कुरु । केषुचिद् ग्रामेषु देशमुखादि अधिकार कस्मैचिद् प्रयच्छन् राजा स्वनाममुद्राङ्कणपूर्वं तस्मै अधिकारलेख्यपत्र ददाति, तत्तत्प्रामाण्यबलाच्च स देशाधिकारी स्वकार्यं निर्वहति । एव च मम देहगेहप्रदेशाधिकार प्रयच्छता त्वया मदीयरसनारूपलेख्यपत्रे मदधिकारनिर्वाहसौकर्याय त्वन्नाममुद्रा अवश्य देया । त्वन्नामबलादेव निर्वहामि न त्वन्यथा प्रभविष्यामीति भाव ॥ ४६ ॥

रसनोक्तं कुरु सर्वं शिव तव नामाधिमुद्रितास्तीयम् ।
गणयसि मुद्रां न हि चेत् प्रभुतोच्छिन्ना[३१] तवैव स्यात् ॥४७॥

रसनायां मे मुद्रां दत्वा मामधिकारीकृतवतस्ते मदीयरसनाधीनता प्राप्तेत्याह रसनोक्तमिति । हे शिव ! मद्रसनोक्त सर्वं कुरु, यत इय मे रसना तव नामाधिमुद्रिता । भवत प्राप्ताधिकारा सा कार्यकरी यद्यद्वक्ति तत्तद् बाढ बाढमित्येव त्वयाभ्युपगमपूर्वमनुष्ठेयम् । तथा न करोषि चेद्, रसनादत्ता मुद्रा न गणिता स्यात्, मुद्रां त्वदाज्ञारूपां न गणयसि चेत् तवैव प्रभुता उच्छिन्ना स्यात् । एव च त्वन्मुद्राधिकारायैव त्वया मद्वचनानुष्ठानमवश्यमापतितम् ॥ ४७ ॥

---

३० °लेख्यपत्रे—R. ३१ प्रभुता छिन्ना—R ३२ तद्दारिद्र्ये मे°—R

अत्याटिनं करालं भिक्षायुक्तं कपालशूलकरम् ।
मद्दारिद्र्यं[33] भैरवरूपं कुरु चार्धचन्द्रयुतम् ॥ ४८ ॥

अत्याटिनमिति । अत्याटिनं अतिभ्रमणशीलं करालं घोरं भिक्षायुक्तं भैक्षयाञ्चोपेतं कपालशूलकरं परमेश्वरपक्षे कपालः शूलश्च करे यस्य सः, तमिति । दारिद्र्यपक्षे कपालस्य शूलः वेदना, तं करोति, तमिति । एवं भैरवरूपं भैरवस्य तव रूपमिव रूपं यस्य तम्, भैरवं भयङ्करं रूपं यस्य तमिति च । मद्दारिद्र्यं अर्धचन्द्रयुतं कुरु भैरवरूपसंपूर्त्यै चन्द्रशेखरं च विधेहि । अर्धचन्द्र इति निष्कासनकर्मणि साचोर्हस्ताभिनयस्य नाम । तद्युतं कुरु, निष्कासयेति भावः ॥ ४८ ॥

दारिद्र्यचण्डरश्मौ[33] प्रतपति केदारवच्च मयि शुष्के ।
जलधरतायां[34] सत्यां त्वयि शिव नाद्यापि समुपैषि ॥ ४९ ॥

दारिद्र्येति । दारिद्र्यचण्डरश्मौ निर्धनतासूर्ये प्रतपति मयि च केदारवत्क्षेत्रवच्च शुष्के सति, त्वयि च जलधरतायां मेघतायां सत्यां, हे शिव, नाद्यापि समुपैषि । मामुदकवर्षैः सम्यगार्द्रीकर्तुं प्लावयितुं चेति शेषः । 'जलधरता या सत्यं तव शिव नाद्यापि समुपैति' इति वा पाठः । या जलधरता तव सत्यं वर्तते सा नाद्यापि मदार्द्रीकरणाय समुपैतीत्यर्थः । जलधरो मेघः, शिवश्च गंगाधरत्वाज्जलधरः ॥ ४९ ॥

दारिद्र्याख्यमनोभूः क्लीबं चेतोऽपि मोहयत्यनिशम् ।
एनं लीनं कर्तुं धन्यः[35] कोऽन्यस्त्वदन्योऽस्ति ॥ ५० ॥

दारिद्र्येति । दारिद्र्याख्यमनोभूः दारिद्र्याभिधमन्मथः क्लीबमपि चेतोऽनिशं मोहयति । एनं दारिद्र्यमन्मथं लीनं कर्तुं नाशयितुं त्वदन्यः त्वद्व्यतिरिक्तो धन्यः कोऽन्यो अस्ति । न कोऽपि इत्यर्थः । यतस्त्वं मन्मथदाही ततस्त्वदन्यो कोऽत्रेष्टे ॥ ५० ॥

---

३३. दारिद्रये चण्ड°—R.
३४. जलधरता या सत्यं तव शिव नाद्यापि समुपैति—R.
३५. कोन्यः स्त्वद°—M, P ; कोन्यः स्त्वद°—R.

भालानलाक्षियुक्तस्त्रिजगति नान्यो मदन्य इति ।
गर्वं मा वह यावद्दारिद्र्याग्नि कपाले मे ॥ ५१ ॥

भालानलेति । भाले अनलाक्षणा वह्निरूपेण नेत्रेण युक्त मदन्य मद्भिन्न अन्य त्रिजगति न इति नास्तीति मा गर्वमुद्वह, यतोऽहं ते प्रतिद्वन्द्वी प्राप्त । यावत् मे कपाले दारिद्र्याग्नि अस्तीति शेष ॥ ५१ ॥

चेत कुरु मा कलह तव वैक्लव्येऽपि शम्भुना प्रभुणा ।
न वदति यद्यपि भर्ता तवोपकर्ता स एवास्ति ॥ ५२ ॥

चेत इति । हे चेत ! तव वैक्लव्येऽपि व्याकुलतायामपि प्रभुणा शम्भुना त्व मा कलह कुरु । भर्ता यद्यपि न वदति, एतत्ते करोमि इत्यादिक न वदति, तथापि स एव तव उपकर्ता अस्ति । नायतस्त उपकारो भावी, स च अवश्यमुपकरिष्यत्येव ॥ ५२ ॥

अयि चित्त वित्तलेशे सहजप्रेम्णा कियन्नु [36]लुब्धमसि ।
न तथापि तद्वियोग केवलमास्ते शिवेनापि ॥ ५३ ॥

अयीति । अयि चित्त । वित्तलेशे सहजप्रेम्णा कियन्नु लुब्धमसि ? कियदिव लोभि अत कृ छृगत च असि ? तथापि न केवल तद्वियोग वित्तलेशवियोग अपि तु शिवनापि वियाग अस्ति । न केवल वित्त न प्राप्तम् अपि तु शिवोऽपि न प्राप्त । वित्त यावत् सहज प्रेम यावांश्च लाभ कृत, तस्य लेशोऽपि यदि शिव कृत, त्वया एतावता शिवो लब्ध स्यादिति भाव ॥५३॥

चेत कीर विहार परिहर परित स्वय प्रयत्नेन ।
अत्तु कालबिडालो धावति [37]शिवपञ्जर प्रविश ॥ ५४ ॥

चेत इति । हे चेत कीर मानसरूपशुक ! स्वय रक्षकजनहीन परित विहार प्रयत्नेन परिहर । कालबिडाल मृत्युरूपो मार्जार अत्तु त्वां भक्षयितु धावति । शिवपञ्जर प्रविश । तत्रस्थ त्वां स कालबिडालो न किमपि कर्तु पारयति ॥ ५४ ॥

---

३६ कियन्नु ऊब्ध°—M , कियन्न लुब्ध°—P
३७ °पञ्जर सदा प्रविश—R

चेतःसदागते त्वं प्रत्याशावात्ययानुगतमूर्तिः ।
मा वह विषयारण्ये लीनो भव सच्चिदाकाशे ॥ ५५ ॥

चेत इति । हे चेतस्सदागते चेतोमारुत । प्रत्याशा एव वात्या तया अनुगता मूर्तिः यस्य सः । वात्या प्रबला वातसंहतिः । तादृशस्त्वं विषयारण्ये मा वह; आशावात्याशून्ये सच्चिदाकाशे सच्चिदम्बररूपे भगवति लीनो भव, तत्र शान्तिमुपयाहि ॥ ५५ ॥

चेतः शृणु मद्वचनं मा कुरु रचनं मनोरथानां त्वम् ।
शरणं प्रयाहि शर्वं सर्वं[३८] सकृदेव सोऽर्पयिता ॥ ५६ ॥

चेत इति । हे चेतः । मद्वचनं शृणु । मनोरथानां रचनं त्वं मा कुरु । शर्वं शरणं प्रयाहि । सः सकृदेव एकपद एव सर्वं तत्तन्मनोरथविषयीभूतं सर्वं अर्पयिता अर्पयिष्यति । तवेति शेषः ॥ ५६ ॥

भ्रातः शृणु मच्चेतो मा नय कालं त्वितस्ततो भ्रमणात् ।
कालक्षेपेच्छा चेदवलम्बय कालकालं त्वम् ॥ ५७ ॥

भ्रात इति । हे भ्रातो मच्चेतः । शृणु अवधेहि । इतस्ततो भ्रमणात् भ्रमणद्वारा कालं मा नय । कालक्षेपेच्छा कालं यापयितुमिच्छा चेत्, त्वं कालकालं यमनियामकं शिवमवलम्बय । तत्तद्भोगेप्सया, इतस्ततो भ्रमन् त्वं कालेन याप्यसे; यदि तत्त्वतस्तव कालमेव क्षपयितुमिच्छा, तत्र कालकालाश्रयणमेव परमोपायः ॥ ५७ ॥

अयि चेतोविहग[३९] त्वं विषयारण्ये भ्रमन्नसि श्रान्तः ।
विश्रामकामना चेच्छिवकल्परुहे चिरं तिष्ठ ॥ ५८ ॥

अयि चेत इति । अयि चेतोविहग ! विषयारण्ये भ्रमन् श्रान्तोऽसि । ते विश्रामकामना चेत् शिवकल्परुहे शिवरूपकल्पपादपे चिरं तिष्ठ । स हि ते निकामं विषयाटवीपर्यटनक्लान्तस्य परां विश्रान्तिं प्रदास्यति ॥ ५८ ॥

---

३८. R om. सर्वं.   ३९. °विहगस्त्व—P.

चेतोमधुकर दूरं दूरं कमलाशया[४०] कुतो यासि।
ध्यानादनुपदमेतच्छिवपदकमलं तवायाति ॥ ५९ ॥

चेत इति। हे चेतोमधुकर चेतोभृङ्ग! कमलाशया सरोजाशया धनाशया च। कमल सरोजम्, कमला लक्ष्मीः। दूरं दूरमतिदूरं कुतः कस्मात् कारणाद् यासि। ध्यानाद् ध्यानमात्रादेव शिवपदकमलं तव आयाति। ध्यानमेव पर्याप्तं, न तु दूरदूरयानमपेक्षितम्, तव न गमनप्रयासः, तदेव त्वामायाति इति व्यतिरेकः ॥ ५९ ॥

चेतश्चकोर तापं भूपं संसेव्य किं वृथा यासि।
यदि चन्द्रिकाभिलाषो निकषा भव चन्द्रचूडस्य ॥ ६० ॥

चेत इति। हे चेतश्चकोर! भूपम् भूपतिं उदरपूर्त्यै ससेव्य तदप्राप्त्या किं वृथा ताप यासि। यदि चन्द्रिकाभिलाषः चन्द्रचूडस्य निकषा समीपे भव। चकोरश्चन्द्रिकया हि वर्तयति। हे चेतश्चकोर तवोचितां वृत्तिं चन्द्रिकारूपां चन्द्रचूडो दास्यति, न तु भूपः ॥ ६० ॥

चेतःकुरङ्ग गीते रक्तं चेतस्तवास्त्वनवगीते[४१]।
भगवद्गीतागीते नगजाकलिते[४२] तदारचय ॥ ६१ ॥

चेत इति। हे चेतःकुरङ्ग हे चित्तमृग! अनवगीते अनिन्दिते गीते गानवस्तुनि ते चेतो रक्तमस्तु। तत् चेत. भगवद्गीतागीते भगवद्गीतासु गीते नगजाकलिते पार्वतीस्वीकृते शिवे आरचय कुरु। कुरङ्गस्य गीतेऽभिनिवेशः प्रसिद्धः। शिवत्वादिभिः अप्पय्यदीक्षितादिभिः भगवद्गीताप्रतिपाद्यपुरुषस्य शिवत्वमुक्तम्। "अपि च 'गीतासु वासुदेवेन यत्पार्थाय प्रदर्शितम्। रूपं निर्वर्णितं तच्च शैवमेव प्रतीयते॥' 'दर्शयामास पार्थाय परमं रूपमैश्वरम्।' इति तत्रैव तस्यैश्वरत्वकीर्तनाद्" इत्यादिकेन सन्दर्भेण शिवतत्त्वविवेके आनन्दलहरीतद्व्याख्ययोश्च, 'गीतासु गूढमुदितं भवतः परत्वम्' इति भारततात्पर्यसंग्रहे च प्रपञ्चितोऽयमर्थः श्रीमदप्पय्यदीक्षितैः ॥ ६१ ॥

---

४०. कमलाशयान् कुतो—P.   ४१. चेतस्त्वयास्त्वनवगीते—R; चेत स्तवास्ति नवगीते—P.   ४२. गिरिजा°—P.

रसने निन्दाव्यसने पैशुन्ये वा न वाग्मितां याहि ।
त्रिपुरारिनाममालां जितकालां शीलयाशु त्वम् ॥ ६२ ॥

'चेतः कुरु मा कलहम्' (५२) इत्यारभ्य 'चेतः कुरङ्ग' (६१) इत्यन्तम् अन्तरिन्द्रियस्य मनसः संबुद्धिः । इतः परं कर्मेन्द्रियाणां प्रत्येकं संबोधनम् । तत्र प्रथमं रसनेन्द्रियमाह रसन इति । हे रसने जिह्वे ! निन्दाव्यसने परदूषणदुरभिनिवेशे पैशुन्ये वा, रहोमित्रभेदिनि अपवादभाषणे वा वाग्मितां वाक्प्रगल्भतां न याहि । जितकालां जितः कालः मृत्युः यया सा, ताम् । जितकालामित्यनेन उत्तमकालक्षेपोपायभूतामित्यप्यर्थः । तादृशीं त्रिपुरारेः नाममालां 'शम्भो शंकर' इत्यादिकां नामावलिं त्वमाशु शीलय । परनिन्दाव्यसनेन मा मृत्युमुखं प्रविश; शिवनामान्युच्चार्य मृत्युं जयेति भावः ॥ ६२ ॥

रसने रसान् समस्तान् रसयित्वा तद्विवेचने कुशला ।
असि तद्वदाशु[४३] पश्येः शिवनाम्नः को रसोऽयमिति ॥ ६३ ॥

यथा च निन्दितभाषणादिषु जिह्वाया रुचिः तथा मधुरादिभोजनरसेषु च तस्या रुचिः । तद्रुचिं विषयीकृत्य पुना रसनां संबोधयति रसन इति । हे रसने ! समस्तान् षडपि केवलान् मिश्रभेदांश्च रसान् आम्लमधुरादीन् रसयित्वा तद्विवेचने कुशला, इदं मधुरम् इत्यादि वक्तुं समर्था असि । तद्वत् तथा शिवनाम्नः शिवनामरूपभोज्यवस्तुनः अयं रसः इति आशु पश्येः । किं भोज्यान्तरस्वदयसुत ततोऽपि आस्वाद्य इति भवत्येव पश्येत् ॥ ६३ ॥

शिवनामसल्लतां[४४] त्वं रसनापल्लव कदापि न विहातुम् ।
यदि वाञ्छसे[४५] तदा मा कोमलतां सर्वथा जहिहि ॥ ६४ ॥

शिवनामेति । हे रसनापल्लव रसनाकिसलय ! यदि शिवनामसल्लतां शिवनामरूपां सतीं शोभनां वल्लीं कदापि विहातुम् न वाञ्छसे यदि । वाञ्छसे इति चिन्त्यमात्मनेपदम् । 'वाञ्छसि' इति चोपलभ्यमाने साधुपाठे पादे

---

४३. असि तर्वदाशु [Probably for चेत्तदाशु] पश्य शिवनाम्न्यत्र को—R.　४४. °सत्कृतां—M.　४५. वाञ्छसि—P.

मानकन्यूनतापत्ति । 'यदि वाञ्छास्ति तदा मा' इति स्यात्तृतीयपादपाठ । तदा कोमलता सर्वथा मा जहिहि मा त्यज । यावच्च त्व कोमल भवसि, तावच्च त्वयि शिवनामवासो नियत भविष्यति ॥ ६४ ॥

हालाहलस्य ताप शशिना गङ्गाम्बुना न यदि याति ।
शिव मा गृहाण भुजगान् मद्रसनापल्लवे स्वपिहि ॥ ६५ ॥

हालाहलस्येति । यदि हालाहलस्य त्वया भुक्तस्य ताप शैत्योपायभूतेन शशिना गङ्गाम्बुना च न याति, स कथ विषवाह्यभूते भुजगै शाम्येत् । तद् भुजगान् मा गृहाण । शीतले मद्रसनापल्लवे स्वपिहि निद्रा याहि । पल्लवस्रस्तरशयन हि प्रसिद्ध शैत्योपचार ॥ ६५ ॥

लोचन कोऽभूल्लाभ सर्वानेव द्विलोचनान् वीक्ष्य ।
दृष्टस्त्रिलोचनश्चेन् सफल जन्मैव ते भावि ॥ ६६ ॥

इत पर त्रिभि श्लोकै दर्शनेन्द्रियप्रतिबोध । लोचनेति । हे लोचन! सर्वान् द्विलोचनानेव केवल मनुष्यान् वीक्ष्य को लाभोऽभूत् । तव इति शेष । न कोऽपीत्यर्थ । मनुष्याधिक त्रिलोचन शिव दृष्टश्चेत्, ते जन्मैव सफल भावि ॥ ६६ ॥

नालोकते यदि त्वा [४६]मन्नेत्र कृष्णमस्तु मुखमस्य ।
स्वा त्र्यक्ष दक्षता मे दर्शय नयनावलोकस्य ॥ ६७ ॥

नालोकत इति । यदि मन्नेत्र त्वा नालोकते, अस्य नेत्रस्य मुख तारका रूप कृष्ण तमोरूपमस्तु । मन्नत्रमध्य तमोरूपमतस्त्वदालोकनाक्षमम् । हे त्र्यक्ष प्रकाशरूपसूर्यचन्द्राग्निमयनेत्रत्रययुक्त ! त्व नयनावलोकस्य स्वां दक्षतां स्व दर्शनसामर्थ्य मे दर्शय । यद्यप्यह त्वा न द्रष्टु शक्नोमि तथापि न ते मद्दर्शन दुष्करम् ॥ ६७ ॥

---

४६ यन्नत्र [Probably for यन्नेत्र]—R

त्वं लोचनान्धकारे द्रष्टुं[४७] वस्त्वन्धकारभिन्नं किम्।
वाञ्छस्यनेन सङ्गेऽदृश्यमपीदं त्वया दृश्यम्॥ ६८॥

त्वमिति। हे लोचन! अन्धकारे तमसि अन्धकारभिन्नं वस्तु तेजः, ज्ञानमिति यावत्; त्वं द्रष्टुं वाञ्छसि किम्? नैतत् शक्यम्। अनेन शिवेन ज्ञानतेजोरूपेण सङ्गे अदृश्यमपि साक्षात्कर्तुमशक्यमपि इदम् अन्धकारभिन्नं वस्तु ज्ञानम् दृश्यं भवति। अज्ञानाश्रये कदापि न ते ज्ञानप्राप्तिः, ज्ञानप्राप्तेश्च शिवोपासनमवश्यमित्युक्तं भवति॥ ६८॥

श्रवण सखे शृणु मे[४८] त्वं यद्यपि जातो बहुश्रुतोऽसि भवान्।
शब्दातीतं श्रोतुं शिवमन्त्रात् कोऽपरो मन्त्रः॥ ६९॥

एकेन श्रवणेन्द्रियमुपदिशति श्रवण इति। हे सखे श्रवण! यद्यपि भवान् बहुश्रुतो जातोऽसि, तथापि मे शृणु। जात इत्यादि पुंलिंगशब्दानां सखिपदे अन्वयो द्रष्टव्यः। ममेदमवधारय। शब्दातीतं शब्दमार्गमतिक्रम्य वर्तमानं परं तत्त्वं शिवस्वरूप श्रोतुं नादरूपेण भासमानं श्रोतुं शिवमन्त्रात् 'नमः शिवाय' इति रूपात् कोऽपरो मन्त्रः। तेऽस्तीति शेषः। न हि बहुश्रुतवतोऽपि श्रवणेन्द्रियस्य स्वभावोल्लङ्घनेन स्वगुणभूतात् शब्दादेव दविष्ठं वस्तु श्रोतुं शक्यम्। तदपि अनुभवविषयं स्याद् यदि शिवमन्त्रः साध्यत इत्युक्तं भवति॥ ६९॥

घ्राणं[४९] प्राणसखो मे भवसि भवान् पार्थिवोऽसि किमु वान्यत्।
शिवपदकमलामोदे मोदं गन्तासि यदि शीघ्रम्॥ ७०॥

घ्राणेति। घ्राणेन्द्रियमाह। हे घ्राण! त्वं प्राणसखो मे भवसि। उच्छ्वासनिःश्वासमार्गभूतनासिकाप्रवृत्तेः अस्मिन्निन्द्रिये प्राणसखत्वम्। यदि शिवपदकमलामोदे परिमलेषु परमप्रकृष्टे शिवपादसरोजपरिमले मोदमानन्दं शीघ्रं गन्तासि गमिष्यसि, तदा भवान् पार्थिवोऽसि, किमु वान्यत्। नूनं त्वं भाग्यभाङ् महाराज एवासि, किमन्यत्। पृथिव्या अयमिति पार्थिवो

४७. दृष्टं वस्त्वंधकारिभिन्नां किं—R. द्रष्टुं वस्त्वंधकारि कि—M.P.
४८. P om. मे. ४९. घ्राण घ्रा°—R.

घ्राणः घ्राणेन्द्रियम्। गन्धवत्त्वस्य पृथ्व्या लक्षणत्वात् घ्राणेन्द्रियस्य स्वभावत एव पार्थिवत्वम्॥ ७०॥

रामास्पर्शसुखे ते नितरां भो विग्रहाग्रहोऽस्ति यदि।
आलिङ्ग्यार्धरामं रामाऽभिन्नः स्वयं भवसि॥ ७१॥

रामेत्यारभ्य द्वाभ्यां श्लोकाभ्यां स्पर्शेन्द्रियं बोधयति। भो विग्रह! स्पर्शेन्द्रियाधिष्ठानभूतशरीर रामास्पर्शसुखे स्त्रीस्पर्शसुखे ते यदि नितरामाग्रहोऽस्ति तदा *अर्धरामम् अर्धनारीश्वरमालिङ्ग्य आलिङ्ग तन्मयतां गच्छ*। ततश्च स्वयं रामाभिन्नो भवसि। शिवसारूप्यलाभात् त्वमपि रामाभिन्नरूपो भविष्यसि॥ ७१॥

विग्रह विग्रहमेव त्वं कुरु देवेन नाऽमुना सख्यम्।
रुचिरप्यस्मिन् शम्भौ जनयत्यरुचिं स्वदेहेऽपि॥ ७२॥

विग्रहेति। हे विग्रह मच्छरीर! देवेन शिवेन सह विग्रहं कलहमेव कुरु। *अमुना सह न सख्यं कुरु*। यतः अस्मिन् शम्भौ रुचिरपि जनस्य स्वदेहेऽपि अरुचिं विरक्तिं जनयति। शिवानुरागात् ते स्वस्मिन् विरागो जायेत। को हि नाम सचेतनः स्वप्रतिकूलीभूतफलप्रदमभिनिवेशमाद्रियेत। वस्तुत उपदेशस्तु 'कृमिरोगादिदुष्टे मर्त्ये देहे जुगुप्सा या पोषयति, तां शिवे भक्तिं परिचिनु' इति। मा कुर्विति निषेधात् 'अत्ता एत्थ णिमज्जइ' (गाथा स. ७·६७) इतिवत् विधिरूपोऽभिप्रायः॥ ७२॥

संमीलयाशु रामां त्वद्वामाङ्गान्मया समं शम्भो।
जातं ममापि यस्माद् दुःखेनार्धं शरीरमिदम्॥ ७३॥

संमीलयेति। मया समं यथा स्यात् तथा हे शंभो त्वद्वामाङ्गात् त्वच्छरीरवामभागाद् रामां पत्नीम् आशु संमील्य तिरस्कुरु। कथं तत् त्वया समं स्यादिति चेदाह यस्मात् कारणात् दुःखेन ममापि इदं शरीरमर्धं जातम्। पार्वत्यभावे शिवस्यार्धावशिष्टशरीरत्वात् साम्यम्॥ ७३॥

---

५०. *मालिंग तया सार्धं* for *आलिंगयार्धरामं*—R; भवानस्ति for भवसि–R. ५१. संलीनयाशु—R.

अपराधकारिणं मां मत्वा शम्भो यदि त्यजस्येवम्[५२] ।
व्याधः शिरसि पदं ते दत्वा न जगाम किं मुक्तिम् ॥ ७४ ॥

अपराधकारिणमिति । हे शम्भो ! मामपराधकारिणं तवापचारं कृतवन्तं मत्वा यद्येवं त्यजसि, व्याधः ते शिरसि पदं दत्वा मुक्तिं किं न जगाम ? शिरसि पादकरणादधिकोऽप्यपराधोऽस्ति वा ? तथापि कण्णप्पनामा व्याधभक्तः कालहस्तिक्षेत्रे प्रत्यहं मृगयान्ते त्वल्लिङ्गमेत्य पूर्वेद्युः प्रक्षिप्तपुष्पाणि पदैव निरस्यन् नूतनानि कुसुमानि क्षिपंश्च त्वया न किं मुक्तिं प्रापितः । प्रसिद्धा चेयं कथा उपमन्युप्रोक्तशिवभक्तविलासादिप्रतिपादितासु दाक्षिणदेशीयत्रिषष्टिशिवभक्तकथासु ॥ ७४ ॥

पार्थः कलहं धनुषा ताडनमपि मूर्ध्नि ते न किं कृतवान् ।
तत्रापि ते प्रसन्नं चेतः सन्ने मयि कुतो न ॥ ७५ ॥

पार्थ इति । पार्थः अर्जुनः कलहं त्वया सह युद्धं, ते मूर्ध्नि युद्धमध्ये धनुषा ताडनमपि किं न कृतवान् । तत्रापि तथा युद्धताडनादिभिरपराधिनि तस्मिन्नपि ते चेतः प्रसन्नम् पाशुपतास्त्रप्रदानेन । सन्ने न केवलं अनभिद्रुह्यति, परं स्वदुःखैः खिन्ने च मयि कुतस्ते चेतो न प्रसन्नम् ? कौरवजयार्थं दिव्यास्त्रलाभाय अर्जुनस्तपश्चचार; किरातवेषेण वराहमनुधावता शिवेन स युध्यमानः अन्ते तत्प्रसादेन पाशुपतास्त्रं लेभे इति प्रसिद्धैव कथा भारते किरातार्जुनीयकाव्ये च । मध्येयुद्धं धनुषा शिवशिरस्ताडनं च भारते वने कैराते ३९ अध्याये उक्तम् ‘ प्रगृह्याथ धनुष्कोट्या ज्यापाशेनावकृष्य च । मुष्टिभिश्चापि हतवान् वज्रकल्पैर्महाद्युतिः ॥ ’ इति । ‘ गाण्डीवेन किरीटिना सरभसं चूडान्तरे ताडितः ’ इति च केनापि कविनोक्तम् । शिवलिङ्गबिम्बेषु मूर्ध्नि दृश्यमाना रेखा च ‘ पार्थप्रहार ’ इत्युच्यते ॥ ७५ ॥

---

५२. त्यजस्येव—M.

त्वयि तुष्टे रुष्टे वा शिव का चिन्ता स्वदुःखभङ्गे मे ।
उष्णं* वानुष्णं वा[५३] शमयति सलिलं सदैवाग्निम् ॥ ७६ ॥

त्वयीति । हे शिव ! त्वयि तुष्टे रुष्टे सति वा मे स्वदुःखभङ्गे दुःखनाशविषये का चिन्ता ? कापि चिन्ता नास्त्येव । उष्णं वा अनुष्णं शीतं वा सलिलं सदैव अग्निं शमयति । यथोक्तमन्यत्र 'क्रोधोऽपि देवस्य वरेण तुल्यः' इति ॥ ७६ ॥

दोषाकरे द्विजिह्वे रतिमतिशयितां करोषि यदि शम्भो ।
अहमस्मि तथा वितथा कुरुषे [५४]मां दृक्पथातीतम् ॥ ७७ ॥

दोषाकर इति । दोषाकरे चन्द्रे दोषाणामाकरे च । द्विजिह्वे सर्पे खले च । अतिशयितां रतिं महतीं प्रीतिं तदाभरणीकरणपर्यवसायिनीं यदि करोषि, अहं तथा अस्मि दोषाणामाकरः खलश्चास्मि । मां तु वितथा वृथा दृक्पथातीतं अदर्शनयोग्यं कुरुषे ॥ ७७ ॥

चेतो मदीयमेतत्सेवाचौर्ये यदि प्रसक्तं ते ।
दण्डय नितरां शम्भो सर्वस्वं लुण्ठयैतस्य ॥ ७८ ॥

चेत इति । यदि मदीयमेतत् चेतः ते सेवाचौर्ये सेवायाः अकरणेन तद्वञ्चने प्रसक्तम्, हे शम्भो एतच्चेतो नितरां साधु दण्डय । दण्डप्रकारमाह—एतस्य चेतसः सर्वं लुण्ठय, त्वं चोरय । तत् निकाम रिक्तीकुरु । चेतसस्तत्तद्विषयान्तरसत्त्वादेव भगवत्सेवासक्तिर्न जायते । ततश्च 'यस्यानुग्रहमिच्छामि तस्य वित्तं हराम्यहम्' इति उक्तरीत्या मच्चेतसः सर्वं विषयं मुपाणेति भावः । हर इति नाम्नश्चेदं सदृश स्यात् ॥ ७८ ॥

---

* Cf. स्निग्धमालपसि रूक्षमेव वा
त्वत्कथैव सखि मे रसायनम् ।
शीतलं सलिलमुष्णमेव वा
पावकं हि शमयेन्न संशयः ॥ विद्याकरसहस्रकम् ९८३
(Edited by Umesh Mishra, Allahabad University Publications, Sanskrit Series-Vol. II, Allahabad, 1942.)

५३. P om. वा.   ५४. मा—R.

सदनं प्रत्यागमनं कुशलप्रश्नोक्तिरस्तु दूरतरे ।
आलोकनेऽपि शम्भो यदि सन्देहः कथं जीवे ॥ ७९ ॥

सदनमिति । मैत्रीमर्यादया भगवन्तं पृच्छति । सदनं प्रत्यागमनम् मम गृहं प्रति आगमनम् । कुशलप्रश्नोक्तिः किमहं कुशली वर्ते इति प्रश्नवचश्च दूरतरे अस्तु सर्वथा मास्तु नाम । यदि आलोकनेऽपि परस्परसन्दर्शनविषयेऽपि सन्देहः संशयः भवेत्, हे शम्भो कथं जीवे जीवामि ॥ ७९ ॥

आवाहितः स्वभक्तैस्त्वरयैवायासि[५५] सर्वपाषाणे ।
चित्तोपले मदीये हे शिव वस्तुं कुतोऽस्यलसः ॥ ८० ॥

आवाहित इति । स्वभक्तैरावाहितः सर्वपाषाणे शिलामयबिम्बे सर्वस्मिन्नपि त्वरयैव आयासि । तादृशस्सन् मदीये चित्तोपले चित्तमेव उपलः शिला तत्र वस्तुं हे शिव कुतोऽलसोऽसि । 'ओः शम्भोः पलो बोधकः' (अमरव्याख्यासुधा २. ३. ४) इति उपलशब्दनिरुक्तेः मच्चित्तोपले वासस्ते आवश्यकतया आपतित एव । न च मच्चित्तशिला बिम्बीभूतशिलान्तरेभ्यः कठिनतरा, यतः सैव न वासयोग्या ते ॥ ८० ॥

वृषभे पशौ दया ते कियती शम्भो पशुप्रियोऽसि यदि ।
विषयविषाशनतोऽहं पशुरेवास्मीति मां पाहि ॥ ८१ ॥

वृषभ इति । हे शम्भो ! पशौ वृषभे स्ववाहनभूते ते कियती दया । स हि त्वया सम्यग्रक्ष्यते । यदि एवं पशुप्रियोऽसि अहं पशुरेवास्मीति कृत्वा मां विषयविषाशनतः विषयरूपविषदुष्टवस्तुभुक्तेः पाहि । त्वं पशुपतिः, पशुं च सदा रक्षसि, वयं च पशवः सविषाविषविवेकरहिताः विषयाख्यदुष्टाशनाद् यथा न विपद्यामहे, तथा रक्ष ॥ ८१ ॥

---

५५. °स्त्वरयैवासि—R.

त्वयि दृष्टौदासीन्यं तत्स्पर्धातो विवर्धते दैन्यम् ।
मयि तज्जेतुं त्वरया प्रेषय निकटेऽस्ति यत् सैन्यम् ॥ ८२ ॥

त्वयीति । त्वयि मद्विषयम् औदासीन्यं दृष्ट्वा तत्स्पर्धातः तत्संघर्षादिव मम दैन्यं च विवर्धते । यथा यथा त्वमुदासीनः तथा तथाहं दीनः । मयि वर्तमानं तद् दैन्यं जेतुं यत्सैन्य ते निकटेऽस्ति तत्प्रेषय । सैन्यं प्रमथगणरूपम् ॥८२॥

परिपालयाम्यहं त्वां निकटेन मया[५६] किमस्ति ते कार्यम् ।
मैवं दूरे रमणे सुभृताऽपि[५७] न मोदते साध्वी ॥ ८३ ॥

परिपालयामीति । त्वा परिपालयामि; निकटेन मया समीपवर्तिना मया, ते किं कार्यमस्ति इति भगवतः प्रश्नमुत्प्रेक्ष्योत्तरमाह–मैवम् । रमणे दूरे सति सुभृतापि सुसरक्षितापि साध्वी न मोदते, नानन्द विन्दते । तव सामीप्यमेव निकाममभिलषणीय मे इति भावः ॥ ८३ ॥

कतिकतिवारं जननं तव नो जातं न मत्स्मृतिः क्वापि ।
इति कुपितोऽसि यदि त्वत्पदयोर्निदधामि मूर्धानम् ॥ ८४ ॥

कतिकतीति । कतिकतिवारं तव जनन नो जातम् । क्वापि कस्मिन्नपि जन्मनि न मत्स्मृतिः ते जाता इति यदि कुपितोऽसि, त्वत्पदयोः मूर्धानं निदधामि । तव पादयोः अद्य शरणं गच्छामि ॥ ८४ ॥

शिव शङ्कर स्मरारे किञ्चित्प्रष्टव्यमस्ति तत्कथय ।
वञ्चनमेव करिष्यसि किं वा कालान्तरे प्रीतिम् ॥ ८५ ॥

शिवेति । हे शिव शङ्कर स्मरारे ! किञ्चित्प्रष्टव्यमस्ति । तत्कथय । किं वञ्चनमेव करिष्यसि, अनुग्रह अप्रदर्श्य किं वञ्चयिष्यसि, किं वा कालान्तरे भविष्यति काले ते प्रीति करिष्यसि । सर्वथा मा मां वञ्चय; मा च प्रीतिं चिरकालादनन्तर प्रदर्शय, किन्तु अद्यैव प्रकटयेति प्रार्थयति ॥ ८५ ॥

---

५६. ममास्ति ते कार्य–R. ५७. सुभृता नो मो°–R.

यो यन्न[५८] वेत्ति दुःखं कर्म स तस्मिन्नियोजयतु शम्भो ।
भिक्षादुःखं जानंस्तत्र कथं मां नियोजयसि ॥ ८६ ॥

य इति । हे शम्भो ! यः पुरुषः यद् दुःखं कर्म न वेत्ति, स तस्मिन् कर्मणि पुरुषान्तरं नियोजयतु । इदं कर्म इयद्दुःखमिति अजानानः तस्मिन् कर्मणि पुरुषान्तरं व्यापारयतु । त्वं तु न तथा । भिक्षादुःखं जानन् भिक्षाटनावसरे, तत्र भिक्षाकर्मणि मां कथं नियोजयसि । यथा चाह रामभद्रदीक्षितः रामप्रसादस्तवे—

'त्वयि प्रागर्थित्वं भजति बलियज्ञे रघुपते
महत्त्वं ते लुप्तं यदजनि वपुर्वामनतया ।
परेषां किं भ्रूमस्त्वदिह मयि निक्षिप्य करुणां
यथा नाहं याचे कमपि धनिनं कल्पय तथा ॥ ८६ ॥

काकूक्तिर्मुखदैन्यं शिव मे बाष्पस्तथाश्रुसम्पातः ।
त्वय्येकस्मिन् पुरुषे[५९] सर्वमिदं निष्फलं भवति ॥ ८७ ॥

काकूक्तिरिति । हे शिव ! काकूक्तिः साभिप्रायस्वरभेदेन उक्तिः । मुखदैन्यम् । बाष्पः द्वित्राः अश्रुबिन्दवः, अश्रुसंपातः प्रचुरः । सर्वमिदं त्वय्येकस्मिन् पुरुषे । परुष इति पाठे अकरुणे त्वयि इत्यर्थः । निष्फलं भवति । एषु दुःखानुभावेषु एकैकोऽपि पुरुषसामान्यस्य करुणामुत्पादयितुमलम् । परुषे त्वय्येकस्मिन्नेव संमिलिता अपि एते निष्फलाः ॥ ८७ ॥

शिव देहि मे स्वभक्तिं तृष्णा स्वयमेव यास्यति ततो मे ।
पतिमन्यत्र विपक्तं दृष्ट्वा कान्ता न किं त्यजति ॥ ८८ ॥

शिवेति । हे शिव ! मे स्वभक्तिं त्वद्भक्तिं देहि । ततः मे तृष्णा विषयतर्षः विषयासक्तिर्वा स्वयमेव यास्यति । कथमिव । पतिमन्यत्र अन्यस्यां वनितायां विपक्तं बद्धानुरागं दृष्ट्वा कान्ता न त्यजति किम् । तं पतिमिति शेषः । मय्यसौ विरक्त इति स्वयमेव दूरीभवति ॥ ८८ ॥

---

५८. यो यं न—M, R. ५९. परुषे—M (where original पु is changed to प by means of yellow pigment).

गुणहीनोऽपि शिवाहं त्वत्करमुक्तोऽपि तत् पदं यास्ये ।
भ्रष्टोऽपि भूपहस्ताद्गुणतोऽपि शरो यथा लक्ष्यम् ॥ ८९ ॥

गुणेति । हे शिव ! अहं गुणहीनोऽपि त्वत्करमुक्तोऽपि तत् परमं पदं यास्ये । चिन्त्यमात्मनेपदम् । अहं निर्गुणोऽपि अवलम्बकेन त्वत्करेण त्यक्तोऽपि मोक्षपदं प्राप्स्यामि । क इव । यथा गुणतोऽपि ज्यागुणाच्च भूपहस्ताद् अपि प्रमोचुः भ्रष्टः च्युतः शरो लक्ष्यं यास्यति ॥ ८९ ॥

भक्तजनेष्वनुरक्तं धरणीधरकन्यया परिष्वक्तम् ।
प्रख्यातनामधेयं जयतितरां भागधेयं मे ॥ ९० ॥

भक्तेति । प्रख्यातनामधेय शिवपदस्य मङ्गलार्थकत्वेन प्रसिद्धनामधेयम् । मे भागधेयं शिवरूप जयतितराम् ॥ ९० ॥

फणिकुण्डलं वहन्ती[६०] श्रवणे ताटङ्कमप्यपरभागे ।
सितशोणकान्तियुक्ता काचिन्मद्रासना जयति ॥ ९१ ॥

फणीति । काचिद् मद्रासना अर्धनारीश्वररूपा जयति । एकस्मिन् शिवभागे फणिकुण्डलम्, अपरस्मिन् पार्वतीभागे ताटङ्कमपि सौवर्णं कर्णभूषणं श्रवणे वहन्ती । सितया शिवभागे शोणया पार्वतीभागे कान्त्या युक्ता ॥९१॥

[६१]आलिङ्गितोऽपि सव्ये शम्पालत्या शिवः प्रकृतितोऽयम् ।
करुणाम्बुपूर्णगर्भः कश्चिद्धाराधरो जयति ॥ ९२ ॥

आलिङ्गित इति । सव्ये वामभागे शम्पालत्या पार्वतीरूपया विद्युल्लतया आलिङ्गितोऽपि प्रकृतितः स्वभावतः शिवः क्षेमकरः । विद्युतः प्रायोनाशकत्वम्, तद्युक्तोऽपि प्रकृत्या शिवः । करुणाम्बुपूर्णगर्भः दयारूपजलपूर्णान्तरः अयं कश्चिद्धाराधरः मेघः अर्धनारीश्वरशिवरूपो जयति ॥ ९२ ॥

---

६०. वहति—R, P.
६१. आलिगितोपि सव्या सपार्वत्या शिवप्रकृतितोयं—R.
आर्या. ४

जटिलं शिरःप्रदेशे निटिले कुटिलं गले तथा नीलम् ।
हृदयीकृताद्रिबालं [६२]विलसति कालं जयत् तेजः ॥ ९३ ॥

जटिलमिति । शिरःप्रदेशे जटिलं जटायुक्तं, निटिले भाले कुटिलं विषमाक्षणा, तथा गले नीलं कालकूटविषेण, हृदयीकृताद्रिबालं हृदयीकृता प्रेमपात्रीकृता अद्रिबाला पार्वती येन तत् । कालं जयत् यमनियन्तृ तेजः शिवरूपं विलसति ॥ ९३ ॥

धनुरेकत्र पिनाकं सशरं बिभ्रत् तथाऽपरत्राऽपि ।
शरमैक्षवं च चापं किञ्चित् तत् प्रेम मे जयति ॥ ९४ ॥

धनुरिति । एकत्र दक्षिणभागे सशरं पिनाकं धनुः बिभ्रत्, तथा परत्रापि सव्यभागेऽपि शरं कुसुममयम्, ऐक्षवं इक्षुविकारभूतं चापं च बिभ्रत् सत् किञ्चिन्मे प्रेम भक्तिविषयीभूतं अर्धनारीश्वररूपं वस्तु जयति ॥९४॥

वाञ्छितवितरणशीलं[६३] विचित्रलीलं निरालवालं च[६४] ।
ललनालतैकतानं कलये शिवकल्पभूमिरुहम् ॥ ९५ ॥

वाञ्छितेति । वाञ्छितवितरणशीलं अभीष्टदानशीलं, विचित्रलीलं विचित्राः आश्चर्यकर्यः लीला यस्य सः तम् । कल्पवृक्षच्छायायां हि देवानां विचित्रलीलाविलासाः भवन्ति । शिवपक्षे विषभक्षणादयो विचित्रा लीलाः । निरालवालं च, आलवालमम्बोजलपूरणाधारः तद्रहितम् । देववृक्षाणां जलपोषणावश्यकताभावात् । आलवालशब्दस्य लक्षणया पोषकसामर्थ्यसंभवात् जगत्पोषकस्येश्वरस्य पोषकान्तराभावात् शिवस्यापि निरालवालत्वम् । ललनालतैकतानं पार्वतीरूपा स्त्री एव लता तस्याम् एकतानम् एकप्रवणम्, अर्थात् सदा तदालिङ्गितम्, शिवकल्पभूमिरुहं शिव एव कल्पभूमिरुहः कल्पवृक्षः तं कलये ॥ ९५ ॥

---

६२. विकसति—R ; विलसितकालं—P.
६३. °विवरण°—R.　६४. तं for च—R.

परिहृतदुर्जनतिमिरं नगजानन्दैकसिन्धुवृद्धिकरम्[६५]।
नन्दितभक्तचकोरं वन्दे चन्द्रोदयं कञ्चित् ॥ ९६ ॥

परिहृतेति । चन्द्रोदयस्य प्रसिद्धानि फलानि तिमिरापहारः समुद्रवर्धन चकोरप्रीणन च । एव शिवरूपचन्द्रोदयस्यापि दुर्जनपरिहारः पार्वतीहर्षप्रवर्धन भक्तजनप्रीणन च ॥ ९६ ॥

निखिलनिगमैकदुग्धां [६६]दानविदग्धां शुकादिमुनिदुग्धाम् ।
वपुषा सदैव मुग्धां कलये[६७] शिवकामधेनुमहम् ॥ ९७ ॥

निखिलेत्यनेन शिव कामधेनुतया वर्णयति । निखिलनिगमाः सर्ववेदा एव एक दुग्ध पयः यस्याः सा, ताम् । दाने विदग्धा पटुवी ताम् । शुकादिमुनिभिः दोहकभूतैः दुग्धाम् । वपुषा मुग्धा मनोहराम् शिवकामधेनुमह सदैव कलये ॥ ९७ ॥

निर्त्यप्रभाभिरामं विदलितकामं सदार्धधृतभामम् ।
हृदि कोमलं निकामं श्रीशिवचिन्तामणि वन्दे ॥ ९८ ॥

नित्येत्यनेन । शिव चिन्तामणितया वर्णयति । नित्यप्रभया अभिरामम् स्वतःप्रकाशस्वरूपत्वात् । विदलितकाम दग्धमन्मथम् । मणिपक्षे विदलिताः पूरणद्वारा परिहृताः कामाः येन स॰, तम् । सदा अर्धधृतभामम् अर्धे शरीरार्धे, धृता भामा स्त्री येन सः तम् अर्धनारीश्वरम् । सदा अर्धः वृद्धिः यस्य सः ।

---

६५ °सिद्धिवृद्धि°—R. ६६ दानवदुग्धा—R

६७. मुग्धा शिवकामदुधा निकाममवलम्बे—R.

६८. This stanza is om. by R and निर्व्याधि मे etc is given as the 98th and

कुरु बहुशास्त्राभ्यास साधय योगाश्च तेन सुलभोऽहम् ।
कथमत्र नायमात्मेत्यादि शृण्वन्मनः कुर्यात् ॥

is given as the 99th.

धृता भा कान्तिः मा लक्ष्मीश्च येन सः । सदार्थश्चासौ धृतमामश्च तम् इति चिन्तामणिपक्षे । हृदि निकामं कोमलमित्यनेन व्यतिरेकः । मणिस्तु अन्तः-कठिन एव । शिवस्तु अन्तःकोमलः । तादृशं शिवचिन्तामणिं वन्दे ॥ ९८ ॥

निर्व्याधि मे शरीरं निराधि चेतः सदा समाधिपरम् ।
कुरु शर्व सर्वदा त्वं नान्यं कामं वृणे कञ्चित् ॥ ९९ ॥

निर्व्याधीति । हे शर्व ! मे शरीरं निर्व्याधि; चेतस्सदा निराधि समाधि-परं च सर्वदा त्वं कुरु; नान्यं कञ्चित् कामं वृणे । यदि वपुररोगं मनश्च आर्तिहीनं स्वसमाधिमग्नं च भवेत्, को वास्ति परः प्रार्थनीयः कामः ? यथाह श्रीनीलकण्ठदीक्षितः शान्तिविलासे—

भव्ये देहे पटुषु करणेष्वालये श्रीसमृद्धे
कौमारान्ते वयसि कथमप्यप्रवृत्ते च दुःखे ।
प्रत्यग्रुप्पीप्रसवविषया यस्य पुंसो निसर्गात्
प्रत्यग्वक्त्रं भवति हृदयं कस्ततोऽप्यस्ति धन्यः ॥

निर्व्याधीत्यस्य स्थाने क्वचित्कोशे 'कुरु बहु शास्त्राभ्यासम्' इति श्लोकः दृश्यते । कुरु बहुशास्त्राभ्यासम्; योगाभ्यासंच साधय; तेन शास्त्र-योगाभ्यासेन अहं सुलभः इति हे शिव त्वं वदसि किमित्युत्प्रेक्ष्य प्रत्याह—नायमात्मेत्यादि । 'नायमात्मा प्रवचनेन लभ्यः न मेधया न बहुना श्रुतेन । यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा वृणुते तनूं स्वाम् ॥' इत्यादि श्रुत्युदितं वचनजातं शृण्वन् जनः अत्र शास्त्रादौ कथं मनः कुर्यात् । श्रुतिषु यथा त्वयैवोद्घोषितं तथा त्वमेव मां वृणुष्व ॥ ९९ ॥

आर्यापतेः पदाब्जे निहितं शतपद्यपत्रमयपुष्पम् ।
आर्याशतं सुकृतिनां हृदयामोदं सदा वहतु ॥ १०० ॥

स्तुतिग्रन्थमुपसंहरति कविः आर्यापतेरिति । आर्यापतेः पार्वतीपतेः पदाब्जे निहितं शतपद्यपत्रमयपुष्पं शतं पद्यान्येव पत्राणि तन्मयं पुष्पं कमलं तद्रूपं आर्याशतं आर्याणां शतं सुकृतिनां हृदयामोदं सदा वहतु ॥ १०० ॥

अप्पय्यस्य ग्रन्थ. शिवभक्ति. मितकार्यसंपत्तिः ।
अनान्वेतु वृत्त्या पर्याप्ता किं न हेतुसामग्री ॥
यत्सव्यदक्षिणार्धप्रकटीकृतशब्दभावसाहित्यम् ।
तेजस्तदर्धनारीमयमनया प्रीयतां वृत्त्या ॥

॥ इति भरद्वाजकुलतिलकश्रीमदप्पय्यदीक्षितविरचितशैवार्याशतकस्य
श्रीराघवशर्मणा कृता वृत्ति संपूर्णा[६९] ॥

। आर्याशतकं समाप्तम् ।

---

६९ The colophon in M श्रीमदपय्यदीक्षितविरचितार्याशतक संपूर्णं ॥ श्रीसांबसदाशिवार्पणमस्तु ॥ कलकी शीतांशु कुटिलहृदया सापि तटिनी पशुर्नंदी सोय कठिनहृदया शैलतनया । निर्वादन्येषां सततसमवेते दयितया कृता वा मद्भक्ति भव भवति विज्ञापयति च ॥ ॥ ॥

अपय्यादीक्षितकृतशतक पत्र ६

The colophon in R इति श्रीमद्भरद्वाजकुलतिलकश्रीमदपय्यादीक्षितविरचित शैवार्याशतक समाप्त ॥ श्रीरस्तु ॥ शुभ भवतु ॥

The colophon in P इति श्रीमदापय्यादीक्षितविरचितशिवार्याशतक समाप्त ॥ ॥ छ ॥ श्रीसांबार्पणमस्तु शके १७२४ चैत्र वद्य १२ गुरुवासरे इदं पुस्तक समाप्त ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

अकारादि-वर्णानुक्रमेण श्लोकसूची

Select Opinions and Reviews

A BIBLIOGRAPHY OF THE RĀMĀYANA

By N. A. Gore, M A

Published by the author Poona, 1942

Price Re. 1-8-0

—1—

This excellent booklet by Professor Gore of the S. P. College, Poona, is sure to receive an enthusiastic welcome from all serious students of the Ramayana The material for this Bibliography has been carefully prepared and methodically presented Different editions of the Rāmāyana, both critical and uncritical, are first described This is followed by a description of its translations into English and other European and Indian languages A few important abridgments and epitomes in English, Sanskrit or other languages are mentioned next, and finally all important books of general criticism of the poem as well as articles of a similar nature appearing in the various magazines and periodicals are given The matter under each head is alphabetically arranged and in many places appreciative or informative remarks are added in rectangular brackets under the different entries The remarks are a sufficient indication to show that the author was not working in a purely mechanical manner

Journal of the University of Bombay, September 1943 — H D VELANKAR.



This is a small book . in which the young author has collected together a wealth of information about the great Epic He gives information about the text editions, translations, abridgments and epitomes, then he gives the bibliography for criticism

.. Then there is a long appendix in which he gives extracts from authoritative writers on various interesting points connected with the Ramayaṇa, like epic language, poetic art and inter relation of Ramayana and Mahabharata In the second appendix he gives a few points for study and with a subject index and abbreviations, the book ends

The Adyar Library Bulletin DR C KUNHAN RAJA



Professor Gore's *Bibliography of the Ramayaṇa*, the pioneer attempt in the field of Sanskrit literature, will answer a long felt want

The book is divided into nine sections, the first five of which deal with Bibliography proper covering 366 entries in all Then follow "Extracts" from standard authors on topics connected with the *Ramayana*, useful chiefly to students, 'Points for study of the *Ramayana*," a "Subjects Index ' and "Abbreviations "

Summaries and lists of contents have been incorporated in the case of important books and articles The author has tried to make the book as comprehensive as possible, and deserves to be congratulated on the admirable and satisfactory manner in which he has executed his work

We strongly recommended the book to every Oriental scholar

The Indian P E N
1 July, 1943 DR A D PUSALKAR

—6—

.........I have carefully peeped through it with much benefit. You have brought so much useful and relevant information that it has become an indispensable companion to students of the Rāmāyaṇa.

Kolhapur, 11 April, 43. DR. A. N. UPADHYE.

The Ṛjulaghvī or The Mālatīmādhava Kathā

Of Pūrṇasarasvatī, critically edited for the First Time with an Introduction, Indexes and Notes by Prof. N. A. Gore, M.A. with a Foreword by Dr. V. Raghavan, M.A., Ph.D.

—1—

Prof. Gore's painstaking work on the present edition is, I believe, a direct testimony of his being a *Samānadharmā* to both the poet and his poet, commentator Pūrṇasarasvatī. Love in its widest sense makes life worth-*living* and worth-*loving*. It exercises a potent humanizing influence on the roughest mortals in this world owing to its inward appeal. This epitome of Bhavabhūti's love-drama will, therefore, be read with delight by the Sanskrit-knowing public on account of its skilful presentation of the *Mālatīmādhava Kathā* by the author. I fully endorse Dr. Raghavan's recommendation in his Foreword with regard to this work when he remarks : " The *Ṛjulaghvī* will surely be profitable to students who study the *Mālatīmādhava* for examinations and as a Khaṇḍa-Kāvya it can also be independently prescribed for study in the Intermediate Classes of our Colleges."

I congratulate Prof. Gore, the editor of the Poona Orientalist on his scholarly critical edition of the *Ṛjulaghvī* published by him for the first time on the strength of manuscript material unknown to Aufrecht's *Catalogous Catalogorum*.

Indian Antiquary, February, 1944. P. K. GODE.

—2—

... The *Rjulaghvī* is a poetic version of the story of *Mālatımadhava* of Bhavabhuti and, as the name indicates, it is both straight (ṛju) and brief (laghu) in the narration of the rather intricate plot of the play. The work under review is a metrical representation of the story of the *Malatımādhava*

While the author is very faithful in narrating the story of the *Malatımadhava*, it must be said that he is quite **original and refreshing** The verses are very simple, sometimes there are very beautiful descriptions There is a variety of metres used in the narration. The work has its own literary value, apart from its importance as an introduction for the study of the drama

In bringing out the edition the Professor has taken considerable pains to reconstruct a readable text, and considering the fact that he had to depend on a single manuscript, and that only a recent transcript and not the original, **he has done his work exceedingly well** The introduction gives a full account of the text, and one gets a clear idea of the text from this introduction In the foot notes the editor gives the reading founds in his original and also explains the reasons that led him to adopt a particular emendation Comparing the reading as found in the original used with the text as it is printed after reconstruction, one can understand that the editor had a very difficult task before him The text is followed by an alphabetical index of verses in which the metre is also noted after the passage, an index of the metres used in the text with the number of verses in the particular metres and also an alphabetical list of verses taken in this narration from the *Malatımadhava* The notes that follow give meanings of rare words that need explanation and grammatical points and other guides that help a reader

in understanding the text, along with a few corrections in the printing of the text.

The edition is a model of accurate preparation of the text for the press after careful examination of the matter available; there are very few printing mistakes. The printing and get up are very good, just what we have been accustomed to in this series.

The Adyar Library, Bulletin. — DR. C. KUNHAN RAJA.

Copies of the books can be had of

1. The author, 12, Vishnu Sadan, 327, Sadashiv, Poona 2

2. The Oriental Book Agency, Poona.